कत्वनिवेशोऽन्यायइतिभावः। अथान्यायावयवशब्देन न्यायांतर्गतत्वे सति उभयघटकभागद्वयाघटितत्वमात्रनिवेशेरमा
४८ घवः पूज्यः सदाशिवो वंद्य इति प्रतिज्ञैकदेशो माधवः पूज्यः शिवो वंद्य इति भागेऽतिव्याप्तिः रमाधवादिप्रतिपाद्यस्यैव माधवादिप्र
तिपाद्यत्वात् तादृशज्ञानत्वावच्छिन्नजनकतावच्छेदकविषयिताकत्वस्य तादृशभागे सत्त्वात्॥ नन्वेतः लक्ष्यमेव पक्षतावच्छेदकावच्छि वि
न्नप्रकारकज्ञानत्वावच्छिन्नजन्यतानिरूपितजनकताश्रयसमुदायघप्रतिज्ञात्वव्यवहारेण तादृशसमुदायेऽपि नियामकत्वे
न तद्व्यवहारस्यैव त्वादिति वाच्यम्। तस्य लक्ष्यत्वे तत्रावयवलक्षणलक्ष्यतायाः आवश्यकतया अवयवलक्षणाव्याप्तिः रमाधवः
पूज्य इत्यादिसमुदायत्वावच्छिन्नभेदस्य माधवः पूज्य इति भागे सत्त्वेन स्वस्मिन् स्वभेदासत्त्वेन प्रतिज्ञाद्यन्यतमत्वरूपावयवत्वा
भावात् प्रतिज्ञाघटकत्वघटितावयवत्वाभावाच्च। न हि स भागस्तन्न्यायान्तर्गतप्रतिज्ञाऽथ न तन्न्यायावयव इति संगच्छते॥
तस्माद्यादृशानुपूर्वीविशिष्टवाक्ये न्यायावयवत्वव्यवहारस्तादृशन्यायावयवविशेषणावप्रतिवक्तव्यं एवं रमाधवः पूज्य इत्यानु
पूर्वीविशिष्ट एव वाक्ये न्यायावयवत्वव्यवहारेण तस्यैव तदवयवत्वं न तु तदेकदेशस्य तादृशानुपूर्वीविशिष्टवाक्य एव च प्रतिज्ञा
त्वमिति वक्तव्यमिति तदेकदेशस्य प्रतिज्ञालक्षणलक्ष्यतया तत्रातिव्याप्तिर्न च लेपायितैव। अत एव न नु मतंगजो नील इति न्यायांत

५२

गतस्य गजो नील इति भागस्य न्यायान्तर्गतप्रतिज्ञाव्यवहारनिमित्तत्वं न तत्रातिव्याप्तिरतो लक्षणान्तरमाह प्रतिज्ञाघटकत्व इति गो
पालनाथानां द्वितीयावयवलक्षणावतारणमपि संगच्छते अन्यथा प्रतिज्ञैकदेशस्य प्रतिज्ञालक्षणस्यैवावयवलक्षणस्यापि
लक्ष्यत्वेन तत्रातिव्याप्तिकथनमसंगतमेव स्यादिति। न चात्र प्रतिज्ञाघटकत्वनिवेशान्नातिव्याप्तिरिति वाच्यम्॥ ननु प्रतिज्ञाघ
टकत्वमपीति संदर्भविरोधात्॥ एवं सवह्निमानित्युदाहरणैकदेशस्य तत एव वारणे पक्षतावच्छेदकानुसरणवैयर्थ्यापत्तिरिति चेन्न।
ईदृशैकदेशवारणाय प्रतिज्ञामात्राघटकत्वमेव निवेश्यं न तूदाहरणाघटकत्वमपि प्रयोजनाभावादुदाहरणैकदेशस्य लघुतया पक्ष
तावच्छेदकनिवेशेनैव वारणादिति प्राचार्याणामाशयादिति॥ ननु यदि प्रतिज्ञाघटकत्वं न निवेश्यते तदा नीलपर्वतो वह्निमानित्यादि
स्थलीयप्रतिज्ञालक्षणस्य पर्वतो वह्निमानिति तदेकदेशेऽतिव्याप्तिः॥ न च प्रतिज्ञामात्राघटकत्वमुक्तमेवेति वाच्यम्॥ यत्र भागतद्धेतोः
समानार्थतया पक्षतावच्छेदकनिवेशेऽपि नातिव्याप्तिवरिपुतं शक्यते तत्रत्यप्रतिज्ञाविशेषणमेव तदुपादानं न सर्वत्रेत्याशयेन शंकते। यद्य
पीति। नन्वनुषंगपक्षे निगमनैकदेशोऽयं वह्निमानिति भागेऽतिव्याप्तेः सर्वत्रापि प्रतिज्ञाघटकत्वमावश्यकमिति चेन्न॥ पक्षविशेष्य
कसाध्यप्रकारकबोधेऽयं वह्निमानित्यानुपूर्वीप्रकारकज्ञानस्यैव हेतुतया निगमने तादृशानुपूर्व्या एवाभावेनानतिप्रसंगात्। यथाश्रु
ताभिप्रायेणेदं। सकलेति। पर्वतो वह्निमानित्यादिस्थलीयप्रतिज्ञालक्षणस्य तद्देशो गीर्वाणगुरुणाप्युपपादयितुमशक्यत्वादिति भावः॥

५१ विषयितायाउभयत्रापि सत्त्वात् न केवलप्रतिज्ञामात्रे वृत्तिसमुदायत्वस्य तद्व्यापकतासंभवतीत्यनायत्याजनकता
वच्छेदकपक्तिं विलोनीयविषयितायाः अवश्यन्वनिवेश्यतयानोदाहरणीति व्याप्तिः प्रसज्यते इत्यत उदाहरणादित्वस्य
तदेकदेशादित्यर्थमभिप्रेत्य स वह्निमानित्येकदेशे तादृशविषयितानिरूपकत्वसत्त्वाद् इति व्याप्तिं दर्शयति। एवमिति। उभये
ति॥ यत्तु पूर्वकल्पे एतत्कल्पे चोभयेत्यादिविशेषणमनुषंगपक्षे एव अनुषंगपक्षे तु साध्यतावच्छेदकावच्छिन्नेऽबुध्यत्वो
पादानादेव वारणादिति तन्न। अनिरूपितत्वांतन्निवेशस्य दूषितत्वात् पक्षतावच्छेदकनिवेशोत्तरं प्रयोजनाभावेन व्याप
त्वमात्रस्य हेयत्वात् केवलप्रतिज्ञाजन्यबोधमादाय कल्पद्वयेऽपि प्रतिज्ञाहेतुसमुदायानुषंगपक्षेऽपि उभयेत्यादिविशेष
णस्यावश्यकत्वात्॥ अननुषंगपक्षे तु अयमादिनिगमनांतभागवारणाय अबुध्यत्वनिवेश आवश्यकः। विशेष्यवाचकपदा
न्योभयघटकभागद्वयाघटितत्वादिति। वस्तुतस्तु तत्लक्षपोपक्षविशेष्यकसाध्यप्रकारकशाब्दबुद्धित्वापर्याप्तजन्यताव
च्छेदकतानिवेशः तत्पक्षे विशेष्यवाचकपदान्यत्वस्यावैयर्थ्यापरित्यागे वेति न तादृशभागेऽतिव्याप्तिरितिदिक्। ननु प्रतिज्ञा ५१
घटकत्वनिवेशोऽपि स वह्निमानिति भागो वार्यत इति पक्षतावच्छेदकव्यर्थमित्यत आह। नन्विति। एवंच गुरुतरप्रतिज्ञाघटघट

ती
तायाः सत्वेन नतप्रमतंगजो नील इति प्रतिज्ञामात्रस्य त्वानुपूर्वीप्रकारकज्ञानत्वस्य सत्वादिकं। अत्र हेत्वाभासादिवारणा
४१ यविषयितायास्तादृशकारणतावच्छेदकत्वप्रवेशेऽपि न पक्षतावच्छेदकानुसरणवैयर्थ्यम्। तथाहि अवच्छेदकत्वमनतिरिक्त
वृत्तित्वं तथा च कारणतामनतिरिक्तवृत्तिविषयितानिरूपकवर्णसमुदायत्वं तत्त्वमिति फलितं प्रतिज्ञाहेतुसमुदायनिष्ठानुपूर्वीविष
यितायास्तादृशशब्दत्वावच्छिन्नकार्यतानिरूपितकारणतानतिरिक्तवृत्तित्वात्तत्रापीति व्याप्तिवारणायोभयघटकेत्यादिविशेष
णमावश्यकं। उदाहरणविषयितायाश्च किंचिद्धर्मावच्छिन्नविशेष्यकसाध्यतावच्छेदकावच्छिन्नकार्यतानिरूपितकारणतानतिप्र
सक्तत्वादयं च किं तत्रातिव्याप्तिरतः पक्षतावच्छेदकानुसरणमावश्यकम्॥ मतंगजो नील इति ज्ञायामपि नाव्याप्तिः। तद्विषयि
तायास्तादृशकारणतानतिप्रसक्तत्वात्। तदेकदेशे गजो नील इत्यत्रातिव्याप्तिस्तु प्रतिज्ञामात्राघटकत्वं प्रवेश्य वारणी
येति भट्टाचार्याणामाशय इति सूक्ष्मदर्शिनो विदांकुर्वन्तु॥ नन्वेवमपि प्रतिज्ञाद्यघटकत्वं व्यर्थम्। भागवारणाय लाघवेन
तादृशवर्णत्वसमव्यापकसमुदायत्वस्य वाच्यत्वात्॥ एवं पर्वतो वह्निमानित्यनन्तवाक्यघटितसमुदायस्यैव तादृशसमु
दायत्वं न प्रतिज्ञामात्रस्येत्यसंभवोऽतो ज्ञाने यत्किंचित्त्वनिवेशः एवं च यादृशप्रतिज्ञाज्ञानं। हेत्वादिविषयकमेव तज्ज्ञान

४१

इदं तु बोध्यम्॥ तादृशजनकतावच्छेदकविषयितानिरूपकवर्णत्वव्यापकसमुदायत्वनिवेशेऽपि प्रतिज्ञोदासीनसमुदायेऽतिव्याप्तिः। न्यायांतर्गत
त्वेन तद्वारणेऽपि प्रतिज्ञाहेतुघटकसमुदायेऽतिव्याप्तिः तद्वारणाय तादृशसमुदायत्वनिष्ठन्यूनवृत्तित्वनिरूपकत्वं न निवेशयितुं शक्यते प्राग्दूषित
त्वात्॥ किंतु भयघटकत्वे एवं सति प्रतिज्ञाद्वयेऽतिव्याप्तिरवशिष्यते सापि यत्किंचित्प्रतिज्ञात्वाश्रयत्वं तु॥ अथोभयघटकभागद्वयाघटित
त्वं प्रवेश्य वारणीयेति॥ उपनय इति। द्रव्यव्याप्यधूमस्यापि द्रव्यत्वेन साध्यत्वादिति भावः॥ विषयतासमवायाभ्यां साध्यसाधनभावस्थले ज्ञानवा
प्यज्ञानवानित्युपनयैकदेशेऽतिव्याप्तिरतः साध्यतावच्छेदकरूपवैशिष्ट्यमेव निवेश्यम् इदमत्रावधातव्यम्॥ पर्वतो वह्निमानिति प्रतिज्ञानै
कदेशादावन्वयितावच्छेदकमेव तथाविधविषयतानिरूपकवर्णत्वव्यापकसमुदायत्वं वेन प्रतीयते तद्धर्मधर्मितावच्छेदकीकृत्य प्रति
ज्ञापदस्य तादृशसमुदायत्वत्वेन तद्धर्मबोधकत्वात् पर्वतपदं प्रतिज्ञेति प्रयोगस्तु उद्देश्यतावच्छेदकव्याप्यत्वविशिष्टपर्याप्तिसंबंधेन वि
धेयान्वयादपि वार्यते। पर्वतपदे प्रतिज्ञात्वमिति तु विधेयतावच्छेदकव्याप्यत्वविशिष्टपर्याप्तिसंबंधावच्छिन्नाधेयतासंबंधेन विधेयान्वया
दिति॥ प्रतिज्ञाप्रविष्टेत्यादौ स्वसमानाधिकरणकृतिध्वंसासमानकालीनकृतेर्विषयत्वजन्यत्वाभ्यामन्वयः॥ आद्यकृतेः सकलवर्णानु
कूलत्वं॥ प्रतिज्ञाध्वस्तेत्यादौ प्रतियोगितत्वाधिकरणकालोत्पन्नवर्णाधीनशाब्दबोधानुकूलत्वोपयसंबंधेन ध्वंसवत्त्वमिति दिक् तदर्थमिति।

प्रयोजकांतं प्रतिज्ञाप्रतिपाद्य विशिष्टस्यार्थबोधपरिचायकमात्रम्।। वाक्यपदेनोभयघटकभागद्वयाघटितत्वे सति उचितानुपूर्वीकावयवाघ
५३ टकपरं। यद्यपि वाक्यस्यार्थ इति विग्रहस्तथापि फलतो वाक्याभेदस्य तन्न बोधलाभस्तत्र विशेष्यभागस्यैवेत्यर्थात्परित्यागः। अन्येति।।
उद्देश्यत्वमिच्छाविषयत्वं तथा च पर्वते वह्निव्याप्यधूमसाध्यकानुमितिमुद्दिश्य तद्विरोधिव्यापकाभाववत्ताग्रहनिवृत्त्यर्थं यत्र पर्वतपक्षकव
ह्निसाध्यधूमहेतुकन्यायप्रयोगस्तत्रत्योपनये वह्निव्याप्यधूमसाध्यकप्रतिवाक्यतोऽपि भिन्नत्वेन सामान्यतोऽपि प्रतिज्ञाव्यवहाराभावादति
व्याप्तिरित्यर्थः।। प्रतिज्ञाव्यवहारेति।। पक्षसाध्यविशेषानियन्त्रितसामान्यप्रतिज्ञाव्यवहारेत्यर्थः।। दीधितिकारेणैकदेव प्रकृतपदद्वयप्रयो
जनं दर्शितं ननु प्रत्येकं पृथक् एकत्र यादृशेत्यस्य निष्कासनेऽन्यत्र तादृशेत्यस्यापि निष्कासनात् अतः स्वयं पृथक् प्रकृतपदयोः प्रयोज
नमभिधायैकदेवैकत्र यादृशेत्यस्यान्यत्र तादृशेत्यस्य च प्रवेशपर्यवसानमाह।। प्रकृतन्यायेत्यादिना प्रतिज्ञाद्यनुरोधेन प्रतिज्ञा
यां लक्षणगमनानुरोधेन।। अत्र भट्टाचार्यैः प्रतिज्ञासामान्यलक्षणाभिप्रायकतया दीधितिर्लोपिता। ये तु प्रतिज्ञाविशेषलक्षणा
भिप्रायकतया दीधितिं लापयन्ति त्वन्मः। मुत्थापयति यथेति भट्टाचार्यमते प्रकृतपदयोरुपादाने प्यभिन्नपक्षसाध्यकार्थकत
या एकत्र तन्निष्कासनेऽन्यत्र नन्वास्ति एतन्मते च तत्साध्यपक्षकत्वानुमितौ न्यायेच द्विधानिवेश इत्येकत्र प्रकृतेत्यस्यनिष्कास

णेऽप्यन्यत्र न तत्सत्त्वमेवेति रीत्या प्रथमदीधितिफक्किकालापेन दूषणमाह॥ न साध्येत्यादिना समभिव्याहारेणेति। समभिव्याहारेण सोपस्था
॥४८ प्येत्यर्थः॥ स्वंप्रकृतपदद्वयं॥ अभिधानुमितिः। तथा चानुमितौ न्यायेन च प्रकृतपदयोस्तत्साध्यपक्षकत्वनिवेशार्थकत्वे ज्ञानतारोपनयेतत्त
स्थलीयप्रतिज्ञाव्यवहारवारणसंभवात्। यादृशपक्षकेत्यादिना सामान्यरूपेणानुमितिन्यायघटकशाब्दबोधविषयसाध्यादीनामैक्य
विव[redacted]क्षाया निर्बीजत्वापत्तेरिति भावः॥ नन्वेवं कथमुपनयवारणं सति सत्त्वमप्यभावेन दूर्वदलस्य यत्र कुत्र किमत्वे तत्रोत्तरदल
लंत्वात्॥ यत्र कुत्र चिदुत्तरदलसत्वे तत्र पूर्वदलसत्वादित्यत्र रवस्येति स्वनिष्ठमिति। स्वप्रतिज्ञात्वेनाभिमत॥ इदानीं पृथक् यादृशा
साध्यकेत्यस्य व्यावृत्तिमाह। यत्साध्यकत्वस्य न्यायांशेऽनिवेशनीयत्वात्। तथा च यादृशं लक्षणमवशिष्टं तादृशलक्षणमुपनयवा
क्येउपपादयति। यत्पक्षकेति। ननु यत्पक्षकानुमितिसमानविषयकत्वं शा[redacted]ब्दबोध एव कथमुक्तोपनयेऽतिव्याप्तिरिति चेन्न।
व्यापारानुबंधिविषयतया तद्विषयकत्वोक्तेः॥ यद्वा समानविषयकत्वमित्यस्य समानविषयकशाब्दबोधजनकज्ञानविषयत्वमि
त्यर्थः। द्रव्येति। द्रव्यव्याप्यधूमोपि द्रव्यत्वेन साध्य इति भावः॥ एकधर्मावच्छिन्नपक्षकत्वं निवेशस्य व्यावृत्तिं वक्तुं फक्किकामास्यति॥
एतदिति। सिषाधयिषया न्यायप्रयोगांगीकारे यो यो धूमवान् स वह्निमान् यथा पर्वत इत्युदाहरणसंभवेन स वह्निमानिति भागस्यापि

पक्षतावच्छेदकावच्छिन्ने प्रकृतसाध्यप्रकारकबोधजनकत्वसत्त्वेनैकधर्मावच्छिन्नपक्षकत्वनिवेशेऽप्यतिव्याप्तिः। एतदुदाहरणघटकत्वस्या
वश्यकत्वेनैवैकधर्मावच्छिन्नपक्षकत्वनिवेशाव्यावृत्तिर्न संभवत्येवेत्यतस्तदनंगीकारं पक्षानुसरणं। एवं च तत्पक्षे प्रयोजनाभावेन
तन्निवेशादुदाहरणैकदेशेऽतिव्याप्तिवारणायैकधर्मावच्छिन्नपक्षकत्वनिवेशनमिति भावः॥ न्यायघटकत्वमात्रस्येति॥ नन्वत्र माध
वः पूज्यो माधवत्वादित्यादौ माधवः पूज्य इति भागेऽतिव्याप्तिः। अग्रे समाधास्यमानत्वात्। प्रतिज्ञाघटकमात्रेति। पादे मात्रपदं न्यूनानतिरिक्त
बोधजनकहेतूपनयनिगमनाघटकत्वस्य वैयर्थ्यं वक्तुं। तदेकदेशेति। प्रतिज्ञाघटकतानवच्छेदकधर्मवत्त्वमिति यावत्। घटकतावच्छेद
कत्वं च प्रतिज्ञात्वन्यूनवृत्तित्वे सति प्रतिज्ञावृत्तित्वं तेन प्रतिज्ञाभेदानुयोगितानवच्छेदकत्वोक्तौ प्रकृतपक्षकत्ववैयर्थ्येऽपि न क्षतिः॥
स वह्निमान् यथायं पाषाणमयः इत्युदाहरणैकदेशवारणायैकधर्मेति। अग्रेऽन्यथैव लक्षणं परिष्कृत्य पक्षतावच्छेदकादिनिवेशप्रयोजन
स्य प्रदर्शनीयत्वात् मास्त्विदानीं तद्व्यावृत्तिरित्याशयेनाह॥ वस्तुत इति। पक्षेति किंचिद्धर्मावच्छिन्नविशेष्यकानुमित्यादिघटितस्य तन्न्या
यत्वघटकप्रतिज्ञात्वं घटकानन्यानतिरिक्तविषयत्वनिर्वाहः॥ निर्धर्मितावच्छेदककपरोक्षज्ञानाभावात्॥ अनतिप्रसक्तस्य महा
नसं वह्निमदित्यादिन्यायावृत्तेस्तथा च पर्वतो वह्निमान् धूमात् यो यो धूमवान् स वह्निमान् वह्निव्याप्यधूमवानयमिति महानसा

दिपरे दंपदघटितं पंचकस्य न्यायत्वापत्त्या तदाय वाक्ये प्रकृतलक्षणातिव्याप्तिर्बोधातस्यालोकात् यो यो धूमवान् स वह्निमानित्यादिवा
॥४४ क्यचतुष्टयघटकवाक्यस्य॥ यत्किंचिद्धर्मविशिष्टहेतुविशिष्टहेतुत्वप्रतिपादकत्वादिरूपयत्किंचिद्धर्मविशिष्टघटितहेतूदाहरणादिल
क्षणसत्त्वात्॥ तथा च पर्वतो वह्निमान् धूमान् योय आलोकवान् स वह्निमानित्यादिवाक्यघटकाद्यवाक्येऽतिव्याप्तिः॥ अनतिरिक्तविषयत्वे
नान्यथासिद्धिं निरस्यति। अनतिरिक्तेति। प्रकारांतरेण तन्निवेशने वक्ष्यमाणरीत्यातिव्याप्तिलग्नतापत्तिरतस्तं निधेषति॥ नन्विति। अनतिरि
क्तविषयकत्वमित्यनुषज्यते उक्तेति कल्प्ये प्रकृतानुमितौ आलोकनिष्ठं ज्ञानज्ञाप्यत्वं भासते न वह्निनिष्ठमिति हेतुजन्यबोधस्य तद्विषयकत्वा
भावो नास्तीत्यतिव्याप्तिलग्नकतापत्तावपीत्यर्थः॥ तादृशेति। हेतौ धूमसान ज्ञाप्यत्वे वह्निनिष्ठत्वाभाने नवेन्हो तादृशधूमज्ञानज्ञाप्यत्वसंशय
निवर्तकत्वावच्छेदकविषयताशून्यत्वादिति भावः॥ अर्थपदांतर्भावेणैव निगमनत्वस्य वक्तव्यतया आवश्यकत्वेन तस्मादिति॥ अवयवांतरबहि
र्भावः स्वघटितावयवघटकत्वं। एतच्च वह्निव्याप्यधूमवानयं अयं तस्माद्वह्निमानिति वह्निव्याप्यधूमवान् अयं तस्माद्वह्निमानिति वानक
थकसंग्रहाय इति सूचनाय कर इति। एतादृशप्रश्नप्रतिपाद्या किंचिद्धर्मावच्छिन्नपक्षोद्देशकतादृशवह्निविधेयकज्ञाने ज्ञापकतावच्छेदका
वच्छिन्नोद्देश्यकधूमज्ञानज्ञाप्यवह्निविधेयकबोधविषयिणी तादृशबोधजनकादेव निवर्तते नान्यथेति भावः॥ ननु वह्निव्याप्यालोकवा

न्पर्वतो वह्निमानित्यादौ विशिष्टपर्वते वह्निज्ञापकं किंचित्याकांक्षाप्रसंग इत्यत उत्सर्ग इति। तत्र तादृशाकांक्षा न जायते प्रतिज्ञातत आलोकोपस्थितौ
४५. नदुत्तरमानसज्ञानेनापि तद्विषयसिद्धेरिति भावः॥ कस्तादृशवह्निमानिकांक्षाया नियतत्वात् सामान्यत आकांक्षोत्थापकत्वाव्यभिचारो दर्शितः॥
यद्वा तत्र सामग्र्यो विशेनप्रतिज्ञाहेत्वर्थयोर्विशिष्टवैशिष्ट्यावगाहिबोधस्तत उपनयार्थबोधे व्याप्त्यादिविशिष्टहेतुज्ञाप्यवह्निमान् पर्वत इति
मानसं तत्र न तादृशाकांक्षेति उत्सर्गपदोपादानं॥ नन्वेवं कोरक्तदंडवान् इति समवाये नरक्तत्वविशेषितदंडविशिष्टजिज्ञासाया रक्ताभिन्नदंडबोधक
प्रतिज्ञयानिवृत्त्यनुपपत्तिरिति चेन्न। तत्रानायतो दीर्घ्यमानसबोधस्यैव निवर्तकत्वात् प्रतिज्ञायाश्च मानसज्ञानोपयिकपदार्थोपस्थापकत्वादिति।
मणिकारस्याप्ययं पदानुषंगस्वरसोऽस्तीत्याभिप्रायकमित्थं चेति दीधितिमवतारयति॥ निगमनं चेति॥ सत्यंतस्य निगमनाति व्याप्तिवारकत्वा
संभवे कथं न द्वारणमित्याशंकायां पूरितविशेषणादित्याह॥ अनतीति। एतद्विशेषणे मवातिव्याप्तिवारणक्षममिति॥ आबाधितत्वादीति ब्रणिसं
दर्भितल्भ्यं विशेषणे वेत्येवकारेणान्यूनविषयकत्वदलेन वारणं नास्तीति लभ्यते तच्चायं पदानुषंगमावेदपतीतिरीत्यामणिकारस्वरसलाभः
॥ ननु मूलकृतानिगमनस्याबाधितत्वादिबोधजनकत्वं प्रदर्श्यातिव्याप्तिर्वारितेत्यदं च न युक्तं निगमनेतद्बोधकपदाभावात्॥ नन्वाबाधितत्व
प्रतीतिघयोच्चारितत्वनिर्वाहाय साध्यपदलक्षणया तद्बोध इति वाच्यम्॥ वह्निप्रतीतिच्छया धूमपदोच्चारितत्वस्यैवोदीर्घ्यमानसबोधे नैवत

न्निर्वाहे लक्षणास्वीकारस्यायुक्तत्वादित्याह॥ आबाधितेति॥ लक्षणादरालक्षणावृत्तेरादरः ननुलक्षणस्यादर इत्यर्थः संदर्भविरोधात्॥ अ
बाधितत्वं साध्यनिष्ठंपक्षनिष्ठाभावाप्रतियोगित्वं पक्षावृत्तिसाध्याभावव्यापकत्वरूपासत्प्रतिपक्षितत्वमादिपदग्राह्यं व्याप्यतयेति। संबंधोप
॥५६ दर्शनमबाधितत्वादिस्मृतिद्वारातन्मानसजननार्थं॥ वस्तुतस्तु समानाधिकरण्यादिमात्रस्यैवस्मारकसंबंधनासंभवाद्व्याप्यत्वपर्यंततुधाव
नंतदनुमानलाभाशया। एवंवन्हदो वन्हिमान् जलाद्धूमादित्यादावबाधितत्वादेर्व्यभिचाराद्व्याप्तिपक्षधर्मतयोर्निवेशासंगतिरिति बोध्यम्॥
निरूढेति नीलपर्वतो वन्हिमानित्यादिप्रतिज्ञाद्यनुरोधेन वादिवाक्यनिरूढलक्षणा स्वीक्रियते॥ ननु पृथिवीतरेभ्य इत्यस्यासमर्थत्वेप्रतिज्ञा
— दिघटकसाध्यवाचकपदसमानानुपूर्वीकसाध्यवाचकपदेनैवोदाहरणादिप्रयोग इति नियमाद्यन्नेतरेभ्यो भिद्यत इत्याकारप्रदर्शनस्यायु
क्ततयातथानभिधाय यत्र पृथिवीतरेभ्यो भिद्यत इत्यस्यानुपूर्वीप्रकारेण्यसाध्यनिर्देशोऽसंगत इत्यत आह। प्रतिज्ञादाविति। एकेनैवसमा
नानुपूर्वीकपदेनैवसाध्यादिनिर्देशएवेति नियमो न सर्वत्रेत्युक्तेः क्वचित्स्थले संभवेपि नत्वाविरे क्युदाहरणे यदितरत् तत्र पृथिवीपृथिवीत
रेभ्यो भिद्यत इत्यादौ यन्नेतरभिन्नं तत्र पृथिवीत्यादेरपि कथकसंप्रदायसिद्धत्वात्॥ अन्यथ्युदाहरणे तु पदभेदप्रयुक्तार्थभेदभ्रमस्युदा
येकेनेत्यादि नियमानंगीकारेण॥ अत्रैकेनैवपदेन न तु पदद्वयेनेत्यर्थः॥ तेन प्रतिज्ञावाक्ये इतरेभ्यो भिद्यत इति पदद्वयेन साध्यनिर्देशोपि

५६

नक्षतिः। तेनेतरपदस्य पृथिवीतरार्थकत्वेनेति व्याख्यानमशुद्धं तथा सति तेनेत्यादितः प्राकृप्रतिज्ञादावितिपंक्त्यसंगतिप्रसंगात्॥
पदद्वयेन साध्याघनिर्देशनियमनिराकरणेऽपि यत्र पृथिवीतरेभ्य इत्यादिपृथिवीपदघटितोदाहरणकथंतायाः अनिवृत्तेः। साध्यवाचक
पदद्वयस्य प्राथमिकत्वेन तत्कथंतायाः अनुदयात्तन्निराकरणस्यानुपयुक्तत्वात्॥ ननु लक्षणयानिरूढत्वं नवादिनाप्येतदुपगमबी
जं किंतु स्वायते शब्दप्रयोगे इतिन्यायएव नहि ग्निनिरूढलक्षणिकनीलादिपदेतरपदेन नीलपर्वतादिपक्षकप्रतिज्ञा सुकरा इह तु तथा
विधेतरपदान्यपृथिवीतरपदघटिता सुकरेति विशेषमनसि कृत्वाह॥ विशिष्येति॥ प्रकृतानुमित्यनिवर्त्य संशयानिवर्तकत्वरूपस्या
नतिरिक्तविषयकत्वस्य सत्वदशायां कीदृशमन्यूनविषयकत्वं निवेश्यत इति पृच्छति॥ अन्यूनविषयकत्वं हीति॥ सर्वस्मा
दिति॥ पक्षतावच्छेदककोटौ सर्वस्मादित्यस्यानिवेशेन हेत्ववयवेनातिव्याप्तिः। संभवति। तज्जन्यबोधे सर्वज्ञानताप्यत्वस्यातिरि
क्तस्याभावात्। अतस्तत्र सर्वस्मादिति निर्देशः॥ एवं च प्रकृतानुमितावपि सर्वज्ञानताप्यत्वप्रमानाधेतुजन्यबोधेपि तत्ज्ञानेप्यनतिरिक्त
विषयकत्वमक्षतमिति भावः॥ एवमग्रेपि पंचम्यंतस्य पक्षतावच्छेदककोटिनिवेशस्येदमेव प्रयोजनं द्रष्टव्यम्॥ कालिकप्रसंबं
धेन हेतुतया विफलत्वार्थहेतुत्वान्वयाय कालत्वेति॥ प्रमेयतादात्म्येन पक्षतावच्छेदके बोध्यं॥ प्रमेयवन्निष्ठहेतुत्वमिति पाठांतरे प्रमेयादि

त्यत्र ज्ञापकत्वं पंचम्यर्थ इति मते तस्य विरोध्यत्वेनैव भानात्॥ प्रमेयनिष्ठहेतुत्वं तदर्थो बोध्यः॥ तथापदं साध्यं बोधयत्विति तात्पर्यभ्रमसंभवार्थ
५२ सर्वनामेति। साध्यव्याप्यबोधजनकत्वेन तात्पर्यविषयं वेदं तथापदमिति तथाक्रममिति संभवः॥ हेतुतात्पर्यभ्रमं प्रकारेण कथयति लोके दाहर
णेऽनतिरिक्तवृत्तित्वपदानि वेशेऽतिव्याप्तिं संगमयंति तन्मतानि क्रमेण दर्शयति॥ तात्पर्यक्रमेणेति॥ नत्र्यपदं यत्तत्पदार्थजलादिं विशेषित
स्यार्थं बोधयत्विति तात्पर्यभ्रमणेत्यर्थः॥ भूतलं यद्भिन्नत्तमानये त्यादौ तात्पर्यप्रसिध्यम्॥ इतरेति। नन्वेवं पश्यत्मृगो धावतीत्यादौ दर्शनविशे
षणमृगविशेषणतयाऽस्यातार्थभानस्यानुभवसिद्धस्य विलोपप्रसंगः॥ धावति मृगस्तं पश्येत्यादिशाब्दबोधोपगमे वाक्यभेदो दुर्वारः॥ अ
थ मृगकर्तृकं यद्धावनं तत्पश्येति बोधोऽत्युत्पत्तिवैचित्र्यात् मात्वो घटो भवतीत्यादौ नीलकर्तृकं पदसाधारण्यधर्मात्मकं भवनं तदाश्रयो
घट इति शाब्दबोधस्यान्यत्र स्वयं स्वीकारादिति चेन्न॥ आमंत्रयति शिष्यो धावति अस्ति तदुःखः पचतीत्यादौ तथाप्यगतेरिति चेन्न धात्वर्थेतर
विशेषणतावच्छेदकतयाऽस्यातार्थभानस्यानभ्युपगमात्॥ प्रकृते च धावनाश्रयमृगादेः स्वकर्मकत्वसंबंधेन दर्शनाद्यन्वयः॥ एवंतत्र
योगस्योत्पत्तये तं दुःखः पचतीति प्रयोगवारणाय चाख्यातार्थविशेषितनामार्थक्रिययोः साक्षादन्वयबोधानंगीकारात्॥ क्रमादमुं
नारद इत्यवबोधितस्य इत्यादौ धात्वर्थज्ञाने नारदस्य कर्मतासंबंधेन न साक्षादन्वयः किंतु तादात्म्यसंबंधावच्छिन्नप्रकारीतारूपे
स्य

४१

इतिपदार्थस्यान्वयिनस्तस्यान्येनाभिधानात्कारकपदात्प्रथमाप्रातिपदिकार्थमात्रे तदनुशासनात्॥ तादृशप्रकारितायामेवाकृति
ज्ञानप्रयोज्यत्वं क्रमात्पदार्थोऽन्वेतीति न कोपि दोषः॥ अत एव चैत्रो धावति मृगः पश्यतीत्यादिकाप्रतिज्ञानन्व पुष्पं जिघ्रति चैत्र इत्यादौ
नात्मनश्चैत्रपदार्थत्वेपि पश्यचैत्रः पुष्पं जिघ्रतीत्यादौ शरीरविशेष एव तत्पदार्थो वाच्यः आत्मनस्तदर्थत्वेऽस्ति सौरभं पश्ये
तिप्रयोगवारणाय लौकिकविषयितायाः एव संबंधत्वाद्योग्यतापत्तिः॥ नेः॥ तथा च समवायेन तत्र धात्वर्थाश्रयत्वान्वयो दुर्घट
इति वाच्यम्॥ अवच्छेदकतासंबंधावच्छिन्नाश्रयत्वादेराख्यातार्थत्वस्य गंधलौकिकसाक्षात्कारानुकूलघ्राणसमीपपुष्पनय
नादेर्वा जिघ्रत्यर्थत्वस्योपगमेनादोषात्॥ अथैवमिदं गुरुस्यः॥ पूर्वेभ्यो नमोवाकं प्रशास्महे विंदम देवतां वाचममृतामात्मनः क
लामित्यादौ नैयायिकानां का गतिः॥ शाब्दिकानां वाणीप्राप्तिरूपेदंपदार्थविषयकाशायाः स्वसमानकर्तृकायानमः पदघटित
वाक्यप्रयोगोत्तरकालीनतया बोधसंभवादिति चेन्न॥ वाक्यांतरार्थघटकतया तत्क्रियापरस्येदंपदस्य तत्रोपसंधानवैयर्थ्यस्या
शाविशेषणे शानमः णेदंपदार्थप्रकारकतत्क्रियाविशेष्यकबोधप्रसंगस्य च वारणाय तत्र शाब्दिकानां वाक्यभेदस्येष्टतया नैयायिका
नामदोषात्॥ पचति भवतीत्यादौ च पक्तृत्तिभावनाश्रयते ति न बोध॥ पचति पदे आख्यातार्थनिर्थस्य प्रसंगात्॥ नाविपाककर्तृभावना

श्रयइति बोधः आख्यातार्थस्योद्देश्यत्वाभावात्॥ किंतु पाककृतिरस्त्युत्पत्त्याश्रयतेत्याकारः॥ ननु पाककृतिरूपत्याश्रय इत्येव बोधो
४८ ऽस्त्विति चेन्न॥ प्रत्ययार्थयोरन्वयस्याव्युत्पन्नत्वात्॥ अथैककर्तृकं फलमित्येव बोधोऽस्त्विति चेन्न॥ संख्याकालान्यप्रत्ययार्थस्य विशेष्य
त्वेनैव प्रकृत्यर्थेऽन्वयात्॥ न पचति भवतीत्यादिस्तु आधेयतारूपवृत्तिनियामकसंबंधावच्छिन्नाभावासत्त्वादेव न प्रयोगः॥ चैत्रः पचति भवति
त्वं पचसि भवतीत्यादिप्रयोगाणां प्रामाणिकत्वे स्वकर्तृकत्वसंबंधेनैव चैत्रसंबोध्यादीनां पाकादावन्वय इति दिक्॥ अनिवेशादिति पक्षताव
च्छेदकविशिष्टसाध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहिज्ञानत्वस्य कदाचित्कार्यतावच्छेदकत्वेऽपि निरुक्तन्यूनविषयकज्ञानत्वस्यातथात्वेन
विनिवेशासंभवादित्यर्थः॥ ननु प्रमेयहेतुत्वप्रमेयं प्रमेयादित्यादौ हेतुत्वनयवेऽतिव्याप्त्याऽयं कल्पः पूर्वमेव दूषितः तदिदानीं तत्कल्पमनुसृत्याति
व्याप्तिलापेने संदर्भासंगतीदितआह॥ अथवेति। अत्रायं प्रथमकल्पपरिष्कारप्रकारः किमनातिरिक्तविषयकत्वं न तावत् प्रकृतपक्षे साध्य
तावच्छेदकसंबंधेन प्रकृतसाध्यनिश्चयानिवर्त्यसंशयानिवर्तकत्वं प्रमेयहेतुत्वं प्रमेयं प्रमेयादित्यादौ हेतावतिव्याप्तेः॥ पक्षसाध्यविष
यतान्यविषयताशून्यत्वोक्तौ संसर्गतामादाय असंभव इति चेन्न॥ पक्षतावच्छेदकावच्छिन्नविशेष्यता साध्यप्रकारता इतरान्यत्वस्यो
क्तत्वात्। धूमाद्वह्निमतः सधर्मेत्यादिप्रतिज्ञायामव्याप्तेः प्रकृतसाध्यप्रकारतानिवेश्याविशिष्टहेतुसंबंधघटकसा

ध्यप्रकारतया तादृशविशेष्यतानिरूपितत्वान्न निगमनेऽतिव्याप्तिः। पर्वतः प्रमेयकालीनवह्निमानिति प्रतिज्ञासंग्रहाय साध्य
तावच्छेदकावच्छिन्नप्रकारताप्रवेशस्य हेतुत्वप्रमेयवत्वेतुल्याद्यात्मकत्वात्तादृशादौ हेत्ववयववारणाय न्यूनदले साध्यतावच्छेद
कनिवेशः॥ हेतुत्वं प्रमेयादित्यादौ धर्मितावच्छेदकाप्रवेशेन तादृशविशेष्यतानिरूपितसाध्यप्रकारतासत्त्वान्नातिव्याप्ति
प्रसंगः॥ पर्वतो वह्निमान् पर्वतावृत्तिधर्मशून्यत्वादित्यादौ हेत्ववयवे धर्मितावच्छेदकप्रवेशेतु प्रकृतपक्षमुख्यविशेष्य
कत्वं वाच्यं। तच्च स्वनिरूपकत्वस्वान्यसाध्याघटकपक्षतावच्छेदकावच्छिन्नविषयत्वानिरूपकत्वोभयसंबंधेन तादृशमुख्यविशे
ष्यतावत्वं तेन हेतुत्वं प्रमेयं प्रमेयत्ववत्वध्येतुत्वावृत्तिधर्मशून्यत्वादित्यादिहेतौ नातिव्याप्तिः॥ साध्याघटकत्वनिवेशात्पर्वतः
पर्वतकालीनवह्निमानित्यादौ नाव्याप्तिः॥ न्यायावयवत्वोपादानान्नैकदेशव्युदासः॥ अथवा प्रकृतपक्षे प्रकृतसाध्यविषयकत्वं
यद्बहिर्भूतविषयिताशून्यत्वं तत्॥ तादृशविषयताशालिनिश्चयत्वव्यापकप्रतिबंधकतानवच्छेदकत्वं बहिर्भूतत्वं तादर्थः॥ व
ह्निसामग्रीन आलोकवान्पर्वतो वह्निमान् वह्निसामग्र्या इत्यादौ तादृशानतिरिक्तविषयकप्रकृतसाध्यशाब्दबोधजनकस्य हेतुत्व
प्रमेयं प्रमेयाद्याव्यत्ववत्प्रमेयादित्यादौ तथाविधप्रकृतयरुशाब्दबोधजनकस्य हेतौ वारणाय न्यूनविषयकत्वघटकदलद्वयनिवे

शः॥ नन्वप्रमेयनिष्ठहेतुत्वं प्रमेयानित्यादौ हेतावतिव्याप्तिः पक्षसमानार्थकायेये हेतवस्तदन्यत्वस्य वाच्यत्वात्॥ उत्तरकल्पे च हेतुत्वे आ
४९ धेयतासंबंधेन प्रमेयस्य साध्यत्वे स्वरूपादिसंबंधेन प्रमेयादितिहेतावतिव्याप्तेस्तदन्यत्वं विनाऽवारणाच्च। गगनेपि सर्वत्वेनाधेयता
सत्वात्कालिकसंबंधेन वाहेतुत्वान्न दोषः। स्वस्य स्वधर्मितावच्छेदकत्ववारणाय निरवच्छिन्नविशेष्यतांतरोपगमे च ताहशविषयि
तानवच्छिन्नजन्यतानिरूपितज्ञानकत्वं निवेश्यं॥ यद्यपि ताहशा वहिर्व्याप्तलिंगविषयितारम्न्यत्वन्यग्रे वक्ष्यंश्वोक्तवन्हिसाम
ग्र्याइतिहेतोः इदं जलं निःस्नेहत्वप्रकारकप्रमाविषयकत्वशून्यत्वादित्यादौ सन्नजलतत्र निःस्नेहत्वप्रकारकप्रमाविषयइत्युदा
हरणस्य हेतुत्वप्रमेयात्ज्ञेयत्ववत् प्रमेयादित्यादौ च हेतौ वारणाय निरुक्तान्यूनविषयकत्वनिवेश इति युक्तं तथापि अन्यूनातिरि
क्तपदविहायेति कृत्वानुरोधाजगत्याग इति परैरपरिशीलितः यथाः अत एवेत्यादि घटशब्द इत्यारभ्य वारणार्थत्वादित्यन्तो मिश्रग्रंथः
घटशब्द इति शब्दपदद्योतराकारोत्तरटकारोत्तराकारत्वरूपानुपूर्व्यवच्छिन्नपक्षत्वस्फोरकं न तु निविष्टे वैयर्थ्यात्॥ प्रतिज्ञारूप
शब्दः तदाकारकशब्दप्रतिज्ञारूप्यते॥ नेनेतिव्युत्पत्तेः॥ तेन प्रतिज्ञाशब्दस्योदाहरणैकदेशत्वाभावेपि न क्षतिः॥ तदाकारकशब्दत्वेन
तदुपादानमिति यावत्॥ घटशब्दो गुण इति प्रतिज्ञाबोधस्य घटशब्दो गुण इति शब्दशब्दस्येत्यर्थः॥ अत्रवानुमित्यनु न्यूनानतिरि

४९

क्तविषयकशाब्दबोधजनकत्वमित्यत्र शाब्दपदस्यार्थ अनुमित्यन्यूनानतिरिक्तविषयकज्ञानजनकत्वस्यैव सम्यक्त्वादिति यत्तु
च्येतत्तदा घटशब्दो गुण इति प्रतिज्ञा घटितन्यायघटकोदाहरणे देशीयायो गुणकर्मान्यत्वे सति सत्तावान् स गुणो यथा घटशब्दो गुण
इति प्रतिज्ञारूप दृष्टांतघटकीभूतघटशब्दे ति व्याप्तिलद्विशेष्यक गुणत्वोपनीतभानरूपश्रावणप्रत्यक्षे घटशब्दो गुण इत्याकारकेता
दृशशाब्दस्य विषयविधया जनकत्वात्॥ दृष्टांतघटकशाब्दसमानानुपूर्वकित्तया श्रवणस्य तादृशानुपूर्वीरूपपक्षतावच्छेदकप्रकारक
त्वेन गुणत्वरूपसाध्यप्रकारकत्वेन च प्रकृतानुमित्यन्यूनानतिरिक्तविषयकत्वाच्चासत्तादिभानविरोधिसामग्रीवशाच्छासत्ताद्यभानाद
[redacted]नुमित्यन्यूनातिरिक्तविषयकत्वं। अत्र प्रतिज्ञाप्रत्यक्षमादाय तद्घटकयावदूर्णेषु नातिव्याप्तिरप्रिहिता तस्यापि मवर्ण इयावगा
हित्वेनातिरिक्तविषयकत्वात्॥ नन्वेवमपि प्रतिज्ञाघटकीभूतघटशब्दे वातिव्याप्तिः कुतो नाभिहिता तस्यापि गुणत्वेन रूपेण स्वविषय
कप्रत्यक्षजनकत्वादित्युदाहरणाभिधानं निबीजमिति न्वेवा गुणत्वेन प्रतिज्ञाघटशब्दप्रत्यक्षनोत्पत्तुमर्हति॥ प्रतिज्ञाश्रवणे तत्र गुण
त्वरूपविशेषणोपस्थितेरभावात् विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात् उदाहरणघटकस्य च घटशब्दस्य गुणत्वेन प्रत्यक्षसंभ
ति॥ तत्पूर्वं प्रतिस्यैव गुणत्वोपस्थितेरिति तावत्पर्यंतानुरिति तावत्पर्यंतानुरिति तावत्पर्यंतानुसरणं॥ ननु को गुण इति जिज्ञास

यैव गुणत्वोपस्थितेन रूपेण प्रतिज्ञाघटकत्वात् शब्दप्रत्यक्षं संभवतीति तात्पर्यं तदनुसरणं किमर्थमिति वाच्यम्॥ प्रतिज्ञावाक्यात्पूर्वं नियम
॥९० तो जिज्ञासाया: सर्वत्र सत्वे मानाभावात्॥ अत एव जिज्ञासाबोधकवाक्यानि विहाय पञ्चवाक्यानामेव न्यायत्वमुररीकृतं नवीनैः ननु
घटत्वत्वादिना प्रतिज्ञायाः कथं श्रवणं स्वत्वादीनां पूर्वमनुपस्थितेरिति चेन्न॥ अनुपस्थितस्य गुणत्वस्य मानानंगीकारेप्यनुपस्थि
तानां घत्वादिना भानस्य सिद्धांतसिद्धत्वात्॥ प्रत्यक्षभिन्ने घत्वादिना शब्दज्ञाने एव विशेषणज्ञानमुद्रया घत्वादिज्ञानस्य हेतुत्वात्॥
इहापि वा घत्वादि निर्विकल्पकस्वीकार्यमिति॥ इदं तु बोध्यम्। उत्तरत्वं ध्वंसे स एव सन्वानुपस्थितोपि पूर्ववर्णस्य संसर्गः उत्तरवर्णप्र
त्यक्षं तत्संसर्गेयापूर्ववर्णोपनीतभानात्मकं॥ एवं पूर्ववर्णविशिष्टोत्तरवर्णोपनीती॥ तमानात्मकं तृतीयवर्णप्रत्यक्षोत्तरमिति री
त्यावरमवर्णप्रत्यक्षमित्येकः पंथाः॥ ध्वंसस्य संसर्गत्वे मानाभावात्पदप्रत्यक्षे आनुपूर्वी न भासते किंतु ध्वंसं ज्ञात्वा ध्वंसरूपपूर्ववर्णोत्तर
त्वप्रकारके मानसमित्यपरः॥ पंथा इति। दृष्टांतरूपशब्दे स्यति। ननूदाहरण घटकस्य घटशब्दो गुण इति वाक्यस्य प्रतिज्ञावाक्यरूपदृ
ष्टांतबोधकत्वस्यैव सत्वेन कथं तद्भूयत्वमिति चेन्न॥ दृष्टांतो रूप्यतेऽनेनेति व्युत्पत्त्या दृष्टांतरूपेत्यस्य दृष्टांतबोधकेत्यर्थात्॥ शब्दप
देदत्तेन्वशाब्दबोधस्य हेतुवैशिष्ट्यावगाहित्वाव्याप्तिरित्युपष्टंभकनिगर्वः॥ साध्येति अभावे प्रतियोगितासंबंधेन भेदस्य भावात्।

मात्रेत्यादि॥ नन्वन्वयव्याप्तिविशिष्टसंबंधबोधस्थले हेतुव्यापकतावच्छेदकवह्नित्वभानात्साध्यतावच्छेदकेतरानवच्छिन्नप्रकारकत्वंनि
५० गमनेऽक्षतमिति चेन्न निरवच्छिन्नसाध्यतावच्छेदकापर्याप्तावच्छेदकताऽनिरूपकत्वस्य तदर्थत्वात् साध्यतावच्छेदकसंबंधावच्छिन्नप्रका
रतानिवेशादेव व्यतिरेकव्याप्तेः साध्याभाववदवृत्तित्वव्याप्तेर्वा निगमनार्थघटकत्वेऽदोषात्॥ यत्त्व यादृशसाध्यतावच्छेदकंसंबंधावच्छि
न्नप्रकारतावच्छेदकताकत्वेनाविवक्षितंपक्षतेति॥ अन्यूनविषयकं सदनतिरिक्तविषयकमित्युद्देश्यविधेयभावमहिम्नाऽवच्छेद्यावच
च्छेदकभावलाभः॥ तादृशेति॥ शुद्धसाध्यतावच्छेदकविशिष्टेत्यर्थः॥ शुद्धवमनुषंगपक्षे निगमनवारणाय॥ नन्वेवं दर्शितसाध्यतावच्छेदक
संबंधोपादानफलं न संभवतीत्यत आह॥ साध्यतेति॥ तत्रत्येति। कालपरिमाणव्यापककालपरिमाणवानयमित्युपनयीयप्रयुक्तहेतुम
त्ताबोधकस्य कालपरिमाणवानयमितिभागस्य वारणीयेत्यर्थः॥ तस्मादिति अयं तस्माद्वह्निमानिति निगमनस्याथवह्निमा
नित्यंशो इत्यर्थः। पक्षपदार्थोपस्थितेस्त्वव्यवहितसाध्योपस्थापकत्वरूपासत्त्यभावेनेत्याशयः॥ इयमपीत्यादीत्यादिनान्व
न्वात्र गंध इत्यादावन्वेत्यादिपरिग्रहः॥ वाक्ययोरिति॥ यद्यप्यग्निहोत्रं जुहोति यवागूं पचतीत्यादावग्निहोत्रहोमसा
धनीभूतयवागूपाकानुकूलकृतिमान इष्टसाधनाग्निहोत्रहोमक इति बोधः स्वीकार्योऽन्यथा यवागूपाकस्य वैयर्थ्यप्रसंगात्॥

तत्रा इष्टानंगीकारात्॥ एवं च तादृशवाक्यार्थज्ञानसहितं तद्द्वययोग्यताज्ञानम् एकवाक्यार्थविशिष्टापरवाक्यार्थप्रतीतिघटि
ततात्पर्यज्ञानं च कारणम्॥ तत्र द्वाक्यार्थज्ञानोपस्थितिका आकांक्षा वाक्यद्वयसन्निधानं चोपयुज्यते॥ ननु वाक्यद्वयाकांक्षा॥ तथा चोक्तम्॥
स्वार्थबोधे समाप्तानामङ्गाङ्गित्वाद्यपेक्षया॥ वाक्यानामेकवाक्यत्वं पुनः संहत्य जायत इति॥ तथापि अत्रैव वादितात्पर्याद्वाक्यैकवा
क्यतानावयवान्तरेणेति बोध्यं॥ एकवाक्यतान्वयत्किंचिदेकविषयतान्तरनिरूपितत्वस्य तद्विशेषणत्वात्॥ विशिष्टेति॥ शुद्धपर्वत
त्वावच्छिन्ने तादृशवह्नित्वावच्छिन्नबोधेच्छाया विशिष्टपर्वतत्वावच्छिन्नतद्बोधजनकेन निवृत्त्यसंभवाद्दीधितौ यदिन्वेति॥ तादृशे
ति॥ तस्मादितरेभ्योपि यत्र इ[illegible]विनिगमनोपगमात्॥ इयं तस्मात्तेन रागेति तु न पक्षपदघटिततया संप्रायविरोधात्॥ न्यूनतां
शंकते॥ यद्यपीति॥ भानं विषयता तथा च भाने प्रमानादित्यक्षानान्वयादाह॥ ज्ञाने इति॥ साध्यसामानाधिकरण्यघटकाधि
करणत्वेन निवेशोऽधिकरणत्वावच्छिन्ने साध्यभानं च्युत्पाद्य साध्ये न रूपेण निवेशो निरवच्छिन्ने तन्द्रानमाहाविशेषेति॥ पक्षेइ
ति॥ अवच्छेदकावच्छेदेनोद्देश्यत्वेऽधिकरणकपक्षेपि व्याप्तिर्द्रष्टव्यः प्राक्पक्षे एकदेशेन दृष्टान्ते इत्यतोऽयमिति॥ हेतोः सा
ध्यतावच्छेदकावच्छिन्नघटितत्वलाभाय प्रमेयत्वस्य साध्यतानुसरणं॥ वक्ष्यमाणेति॥ साध्यतावच्छेदकनिवेशाव्यावृत्ति

५१ दानाय पंचम्यर्थपक्षकप्रतिज्ञास्थल इत्यादिनाहेतुत्वं प्रमेयाद्यन्यत्ववत्प्रमेयादिति यो हेतुर्वक्ष्यते तत्साध्यवतः पक्षत्वे तद्धेतावेव
पक्षतावच्छेदकनिवेशव्यावृत्तिरित्यर्थः॥ यत्तु पक्षमुख्यविशेष्यकत्वनिवेशान्नायं दोष इति तन्न॥ प्रमेयाद्यन्यत्ववद्धेतुत्वं पक्षः॥
तादात्म्येन स्वरूपसंबंधेन वा प्रमेयं साध्यं स्वरूपसंबंधेन तादात्म्यसंबंधेन वा प्रमेयं हेतुस्तत्र प्रमेयादिति हेत्ववयवेऽतिव्याप्तिः॥
साध्यतावच्छेदकसंबंधस्येतद्दलेऽनिवेशस्य वक्ष्यमाणस्य वक्ष्यमाणत्वात्॥ अस्मन्मते तु पक्षतावच्छेदकपर्याप्तविशेष्यता
वच्छेदकताकत्वनिवेशान्नातिव्याप्तिः॥ किंच जन्यज्ञानविषयतात्वाद्यन्यत्ववज्जन्यज्ञानविषयतात्वादिति पक्षमुख्यविशेष्यक
बोधजनके हेतावतिव्याप्तिः॥ जन्यज्ञानविषयतात्वप्रमाजन्यज्ञानविषयेति बोधस्य साध्यतावच्छेदकसंबंधेन जन्य
ज्ञानरूपसाध्यप्रकारकत्वात् पर्वतो धूमवान् वन्हेरित्यादि वारणाय भ्रमभिन्नज्ञानजन्यज्ञानविषयत्वस्य पंचम्यर्थत्वा
त्॥ यद्विषज्ञानज्ञाप्यत्वेएव प्रकृतस्यर्थभानं तदास्यविषयकप्रमाजन्यज्ञाननिरूपितत्वसंबंधेन जन्यज्ञानविषयतात्व
साध्यकोक्तकृतावतिव्याप्तिरित मुख्यात्वसाध्यतावच्छेदकसंबंधयोर्निवेशेऽपि पर्याप्तिनिवेशआवश्यक इति पक्षता
वच्छेदकनिवेशोदुर्वारः॥ संशयेति॥ संशये सत्येव जिज्ञासोदयात्॥ संदिग्धेऽर्थे न्यायः प्रवर्त्तत इति सिद्धांतात्॥

विपरीतोद्भावकपरविजिगीषुकृतन्यायप्रयोगो जल्पः॥ वादेति॥ प्रथमतः संशयनिवर्तकसाध्यनिश्चयसत्त्वेपि अनुमित्सया वानुमिति
चरमकारणपरामर्शप्रयोजकन्यायसंपादिकेति भावः॥ जगदीशेन तु न्यायलक्षणे साध्यसंशयकालीनत्वं विशेषणमुपात्तं त्व
सिषाधयिषास्थले प्रतिज्ञादिवाक्यपंचकस्यालक्ष्यत्वमभिप्रेत्य॥ परे तु तस्य लक्ष्यत्वमभिप्रेत्य सिषाधयिषासाध्यसंशयाद्यवि
प्रतिपत्त्यन्यतरकालीनत्वं तदर्थ इत्याहुः॥ एवं सिद्धिसत्त्वे सिषाधयिषाविरहे प्रतिज्ञादिपंचवाक्येऽतिव्याप्तिवारणाय सिषाध
यिषाकालीनत्वं देयमिति तेनोक्तं तत्र सिद्धसत्त्वे साध्यैऽव्याप्तिरतः पक्षताकालीनत्वं तदर्थ इति तदुभयमपि ग्रंथेस्तुपेक्षितम्॥
यादृशेति॥ हेतुत्वं वह्निमद्वृत्तेस्त्वादौ निरूपितत्वसंबंधः॥ निर्वाच्यमिति॥ अन्यूनविषयकत्वशरीरे साध्यतावच्छेदकसंबं
धावच्छिन्नत्वस्यानिवेशादिति भावः॥ जन्यतेति॥ उदाहरणवारणाय जन्यताविषयितायोनिवेशः प्रतिसामान्येनेति॥ प्र
त्वा तिज्ञात्वसमानाधिकरणत्वे सति प्रतिज्ञात्वावच्छिन्नभेदानुयोगितानवच्छेदकधर्मत्वमर्थः। हेत्वाद्यघटकत्वं तु निवेश्यते प्रयो
जनाभावादिति भावः॥ अत्रन्यानतिरिक्तविषयकत्वनिवेशपक्षे साध्यतावच्छेदकसंबंधविषयकतादृशनिश्चयानिवर्त्य
संशयानिवर्तकत्वं तदर्थे विवक्षणीयं तावतैव च सामानाधिकरण्येन तत्साध्यप्रतिज्ञायां नावच्छेदकावच्छेदेन तत्साध्यक

प्रतिज्ञालक्षणातिव्याप्तिः॥ अथावच्छेदकावच्छेदेन साध्याभावसंशयस्यापि तादृशशाब्दबोधनिवर्त्त्यतया कथं नातिव्याप्तिः॥
नन्वतादृशनिश्चयनिवर्त्त्यतावच्छेदकतानवच्छेदकं यत्संशयवृत्तिविषयितावृत्तिरूपं तद्विशिष्टावच्छिन्ननिरूपितप्रतिबंधकतावच्छे
दकविषयिताशून्यत्वं तदर्थः॥ तादृशं च पक्षतावच्छेदकव्यापकताविशिष्टसाध्याभावप्रकारितात्वमिति न दोष इति बोध्यम्॥ एव
मप्यनवच्छेदेकावच्छेदेकावच्छेदेन साध्याभावसंशयप्रतिबंधकतायाअपि तथाविधनिश्चयत्वव्यापकतयोक्तरूपस्य तन्निवर्त्त्यताव
च्छेदकत्वासंभवादिति चेन्न॥ तादृशनिश्चयत्वव्याप्येकासाध्यसामानाधिकरण्येन साध्यवत्तानिश्चयत्वाव्यापिकाया प्रतिबंधकतात
द्निरूपकसंशयः अवच्छेदकावच्छेदेन साध्याभावसंशयत्वमादायानतिप्रसंगात्॥ अत्रापि तन्निरूपितनिवर्त्त्यतावच्छेदकतान
वच्छेदकेत्यादि प्रागुक्तविवक्षणमावश्यकमन्यथोक्तसंशयस्य सामानाधिकरण्येन साध्याभावसंशयत्वेन तन्निवर्त्त्यतयाः संग्रहा
पत्तेः॥ तादृशनिश्चयत्वव्यापकप्रतिबंधकताकत्वसामानाधिकरण्येन साध्याभावगाहित्वावच्छिन्नप्रतिबध्यत्वोभयशून्यसंशयएववा
निवेश्यः अवच्छिन्नत्वं स्वरूपसंबंधविशेषः॥ नन्वेवमप्यसंभव इति बोध्यम्॥ अवच्छेदकावच्छेदेन साध्याभावगाहिताविरहविशिष्टत
प्रतिबंधकतावच्छेदकविषयिताशून्यत्वस्य वाच्यत्वात्॥ सामानाधिकरण्येन प्रतिज्ञायां तज्जन्यबोधस्यैवावच्छेदकावच्छेदेनसा

ध्यावगाहित्वेऽतिव्याप्तिर्दुर्वारेति चेत्तर्हि तादृशावगाहितावहिर्भूततादृशविषयिताशून्यत्वस्य वाच्यत्वात्। उक्तसमूहालंबनबोधेन्वतादृश
वहिर्भूतसामानाधिकरण्येन साध्यावगाहितायाः सत्वेन न तदोषः॥ तद्वहिर्भूतत्वं च यत्किंचित्तादृशसाध्यावगाहितानवच्छिन्नप्रतिबंधकतावच्छेदकत्वं
तदवच्छिन्नप्रतिबंधकतानवच्छेदकत्वं वा यथामनीषमुपादेयं॥ नन्वेतादृशप्रयासः किमर्थ इति वाच्यम् साध्यतावच्छेदकसंबंधस्यान्यूनविष
यकत्वदलेन प्रविष्ट। प्रयोजनाभावादित्यग्निमग्रंथदर्शनेनेदृशरीतेरेवाभिप्रेतत्वात्॥ ननु संग्रंथः सामानाधिकरण्येन प्रतिज्ञापरोऽस्तु
स्त्वेवच्छेदकावच्छेदेन प्रतिज्ञालक्षणे तद्वैतेतन्निवेशेन बाधकमिति वा साध्यतावच्छेदकसंबंधनिवेशस्य प्रयोजनसत्वेन तदभावकथना
संगतेः॥ तद्दले साध्यतावच्छेदकसंबंधविवक्षायाः अवच्छेदकावच्छेदेन प्रतिज्ञालक्षणेऽत्यावश्यकत्वे तां विस्मृत्य दीधितिकृदुक्तपूर्व
प्रयोजनं ज्ञापयित्वा तत्स्मरणमात्रेण तन्निरस्य दीधितिकृतप्रयोजनांतराभिधानस्य प्रामादिकत्वापत्तेश्चाय द्यपि साध्यतावच्छेदकविष
यकतादृशानिश्चयानिवर्त्यसंशयानिवर्तकबोधसामानाधिकरण्येन साध्यानवगाहित्वेन विशिष्योक्तप्रयासमंतरेणैवावच्छेदेन तत्सा
ध्यकप्रतिज्ञालक्षणमुक्तं तथापि विशेषणांतरमपेक्ष्यावच्छेदकावच्छेदेन साध्यावगाहित्वघटितान्यूनविषयकत्वदलप्रवेशाएव
स्यादिति तदुपेक्षेति॥ सामानाधिकरण्येन तत्साध्यकप्रतिज्ञालक्षणस्यावच्छेदकावच्छेदेन तत्साध्यकप्रतिज्ञायांतु नातिव्याप्तिः शुद्धसा

५२ ध्यतावच्छेदकसंबंधविषयकप्रतिज्ञार्थनिश्चये सामानाधिकरण्यमात्रेण साध्याभावसंशयविरोधिता या सत्वेनैवादोषा
त्।। एवं चेदानीं अन्यूनविषयकत्वदलं एवालाय त्या साध्यतावच्छेदकसंबंधावच्छिन्नत्वं साध्यप्रकारतायां निवेश्यं।। तथा
च पक्षतावच्छेदकावच्छेदेन तत्साध्यकप्रतिज्ञावारणाय अनवच्छिन्नसाध्यतावच्छेदकसंबंधावच्छिन्नसाध्यावगाहित्वं
निवेश्य सामानाधिकरण्येन तत्साध्यकप्रतिज्ञायामपि व्याप्तिवारणाय पक्षतावच्छेदकावच्छिन्नसाध्यावगाहित्वं निवेश्या
वच्छेदकावच्छेदेन तत्साध्यप्रतिज्ञायाश्च लक्षणं फलितं न्यायत्वघटकप्रतिज्ञायामेतन्निवेशे उदाहरणैकदेशे न वार्यंत इति विशेष्य
दले तन्निवेश्य मित्याशयेनाहावच्छेदकेति।। यद्देति क्वचित्पाठः।। अन्यूनविषयकत्वदले आयातं तत्साध्यतावच्छेदकसंबंध
निवेश्य दर्शितव्यावृत्तिनिराकरणप्रयुक्तमित्याशंक्य उभयघटकेत्यादिविशेषणसत्वेन शून्यीव्यावृत्ति स्तत्परित्यागे वाग्नि मायी
त्याशयवानाह।। यद्देत्यवतारणीयं।। ननु हेत्वर्थविशिष्टसाध्यवैशिष्ट्यबोधमादाय प्रतिज्ञाहेतुसमुदायेति। व्याप्तिरत आह अन
तीति।। समुदायः प्रतिज्ञाहेतुसमुदायः।। तथाविधबोधः प्रतिज्ञामात्रार्थबोधः।। सन्प्रतिबंधकत्वशाब्धे त्वर्था विषयको बोध्यः।।
तादृशबोधेति।। प्रतिज्ञामात्रविषयितायाय यावच्छेदकत्वेन तादृशसमुदायविषयितायाः अनवच्छेदकतयाऽतिव्याप्त्यभा

त्वादिति भावः॥ तादृशेति। प्रतिज्ञामात्राघटकत्वनिवेशकल्पे हेत्वर्थबोधकभागघटितप्रतिज्ञामात्रार्थबोधवृत्त्येकदेशार्थबु
द्धित्वावच्छिन्नजन्यतानिरूपितजनकतामादाय हेत्ववयवैकदेशेऽतिव्याप्तिरतो व्यापकत्वनिवेशः॥ तादृशेति॥ प्रतिज्ञाहेतुविषय
कज्ञानजन्यप्रतिज्ञामात्रार्थविषयकशाब्दबोधनिष्ठजन्यतानिरूपितजनकतावच्छेदकविषयिताप्रतिज्ञामात्रनिरूपिते वतन्नि
रूपकवर्णत्वसमनैयत्यस्य तादृशसमुदायत्वेऽसत्त्वान्नातिव्याप्तिः॥ प्रतिज्ञाहेतुजन्यप्रतिज्ञाहेत्वर्थशाब्दबोधनिष्ठजन्यतानि
रूपितजनकतावच्छेदिका प्रतिज्ञाहेतुनिरूपितविषयिताऽपि भवतीति तन्निरूपकवर्णत्वसमनियतत्वस्य समुदायत्वे सत्त्वादतिव्याप्ति
रतोऽनतिरिक्तेति पदसार्थक्यं एवं च तादृशबोधस्यातिरिक्तविषयकत्वान्नातिव्याप्तिरिति। ननु प्रतिज्ञाहेत्वंतजन्यशाब्दबोधनिष्ठ
हेतुत्वविषयकशाब्दबोधत्वावच्छिन्नजन्यतानिरूपिततज्जनकतावच्छेदकविषयितानिरूपकवर्णत्वसमनियतसमुदायत्वस्य हेत्वव
यवे सत्त्वात्तत्रातिव्याप्तिवारणायानतिरिक्तपदसार्थक्यसंभवाद्यथाश्रुतन्यायावयवत्वपरित्यागो व्यर्थ इति वाच्यम्॥ अनतिरिक्तप
दानुपादाने निरुक्तान्यूनविषयकत्वावच्छिन्नजन्यतानिरूपितजनकतायाः हेतुसानेऽसत्वे नातिव्याप्त्यभावात्॥ हेत्वंतसमुदायस्य
प्रकृतपक्षविशेष्यकहेतुज्ञानज्ञाप्यप्रकृतसाध्यप्रकारकशाब्दबोधत्वस्यैव जन्यतावच्छेदकतया तद्घटकान्यूनविषयकत्वस्यापि

५८ तथात्वे यत्तद्वच्छिन्नजन्यतानिरूपितजनकतावच्छेदिका समुदायनिरूपितविषयितापि भवतीति तत्रातिव्याप्तिवारणायानतिरिक्तपदसार्थ
स्यात् इति॥ निवेश्येति॥ अन्यथा प्रतिज्ञात्वे तु समुदायस्योक्तरीत्यैव वारणे तन्निवेशनमनर्थकं स्यादित्यर्थः॥ अत्रेदं बोध्यं॥ एवं कल्पे उभयघ
टकभागद्वयाघटितत्वं चतुष्टयं तु न निवेशार्हं प्रयोजनाभावात्॥ किंतु प्रतिज्ञाहेतूभयघटकभागद्वयाघटितत्वमात्रं तथा च यद्यपि तदुपादा
नेपि अवयवादिनिगमनांतवारकतयाऽनतिरिक्तविषयकत्वसार्थक्यसंभवात् हेत्वंतावारणेपि न क्षतिरिति तत्त्यागप्रदर्शनं व्यर्थं तथापि ते
नैव हेत्वंतवारणात् पश्चात्तद्वैयर्थ्यमभिप्रेत्य प्रथममत एव तत्त्यागो दर्शितः॥ यद्यपि अवयवादिनिगमनांतेऽनतिरिक्तविषयको बोधो नास्त्येवा
यं वह्निमानिति भागस्याबोधकत्वात्॥ प्रतिज्ञायां तु सोस्तीति तमादाय तज्जनकतावच्छेदकविषयितानिरूपकवर्णत्वव्यापकसमुदायत्व
मात्रोक्तौ प्रतिज्ञाहेतुभयाघटकभागद्वयाघटितत्वमावश्यकं॥ प्रतिज्ञोदाहरणसमुदायत्वादिवारणाय प्रतिज्ञात्वाश्रयतदनाश्रयेत्या
द्यर्थश्च तथापि यथाश्रुतदीधितेस्तथात्वाभावात् प्रकारांतरस्यादूषकत्वात् दासमनैपत्यमेव निवेशितमिति॥ नन्वेवं समानार्थकप्रतिज्ञा
द्यादिविषयकज्ञानस्य निर्वक्तव्यान्यूनानतिरिक्तविषयकयत्किंचिद्बोधजनकतया तत्रातिव्याप्तिरित्याशंकां मिश्रा पत्त्रया निराकुरुते॥
समानार्थकेति॥ उभयघटकत्वादिविशेषणनिवेशकल्पेपि तस्य लक्ष्यताया एव स्वीकार्यत्वात्॥ तादृशसमुदायत्वनिष्ठन्यूनवृत्तित्वानि

रूपकत्वरूपविशेषणं तु अनतिरिक्तपदवैयर्थ्याभिपातमणि रूत्संयत्मिति भावः॥ तादृशबोधनिष्ठेति॥ प्रकृतानुमित्यन्यूनानतिरिक्त
विषयकप्रतिज्ञामतिपाद्यसंपूर्णविषयकबोधनिष्ठेत्यर्थः॥ प्रतिज्ञामात्राघटकत्वमेवेति॥ प्रतिज्ञात्वासमानाधिकरणत्वे सति प्र
तिज्ञात्वावच्छिन्नभेदानुयोगितावच्छेदको यो यरूपाक्रान्तधर्मवत्त्वमेवेत्यर्थः॥ नन्वेतत्कल्पे उदाहरणादिघटकसवह्निमानित्यादि
भागवारणमशक्यमिति वाच्यं॥ पूर्वकल्पे स्वरूपयोग्यतारूपजनकतानिवेशेऽप्येतत्कल्पे फलोपधानरूपजनकताया निवेशनि
यत्वात्॥ नन्वन्यूनातिरिक्तविषयकत्वावच्छिन्नजन्यतानिवेशेनैवैकदेशातिव्याप्तिवारणसंभवे प्रतिज्ञामात्राघटकत्वमपि निवे
श्यते प्रयोजनाभावादित्याशंकां निरस्यति॥ अन्यूनेति। ननु प्रतिज्ञामात्राघटकत्वे सति अन्यूनातिरिक्तविषयकशाब्दबोधवृत्तिजन्य
तानिरूपितजनकतावच्छेदकविषयतानिरूपकवर्णत्वसमनियतसमुदायत्वं पर्यवसितं तत्र व्यापकत्वं व्यर्थं हेत्वर्थबोधकभागघटित
प्रतिज्ञास्थले हेतुज्ञानस्य तादृशबोधानुपधायकत्वादिति चेन्न॥ अतिसान्निध्येन तद्विषयकप्रतिज्ञाविषयकसमुहालंबनेन फलोप
धानं संभवतीति हेत्वेकदेशेऽतिव्याप्तिर्न तद्दाहरणादिघटकवह्निमन्यदादिविषयकज्ञान इत्यभिप्रायात्॥ अत्र च हेत्वर्थबोधकभा
गघटितप्रतिज्ञायामपि प्रतिज्ञामा॰वार्थबोधएवाभिसंधिस्तेन तत्र प्रतिज्ञाहेत्वर्थबोधमादाय हेतौ संपूर्णलक्षणेऽपि अतिव्याप्तेरग्रे

५५ भिनेपिनसंदर्भासंगति।। अन्यूनविषयकत्वावच्छिन्नजन्यतानिवेशेन तद्वारणं तत्पक्षे अवयवाघटकेत्यस्य वैयर्थ्यं तत्र च स्वरूपयोग्य
तारूपजनकताया एव प्रवेशात्प्रतिसेकदेशवारणाय व्यापकत्वं हेत्वंतवारणाय व्याप्यत्वमनतिरिक्तविषयकत्वं च निवेशनीयमिति भावः
अवयवाघटकत्वं प्रतिज्ञाद्यघटकत्वं प्रतिज्ञामात्राघटकत्वं वा। अत्रानतिरिक्तविषयकत्वापादानेपि अन्यूनविषयकत्वावच्छिन्नजन्यता
निवेशावश्यकतां प्रदर्श्यावयवाघटकत्वनिवेशवैयर्थ्यमाशंकते।। नन्वेति।। अन्यूनविषयकत्वनिष्ठावच्छेदकताकत्वमेव जन्यता
यां निवेश्यं न त्ववच्छेदकतापर्याप्तिरिति वक्ष्यते।। अन्यथा प्रतिज्ञाहेतुसमुदायेऽतिव्याप्त्यप्रसक्तेः।। तादृशसमुदायजनितो यो विशि
ष्टवैशिष्ट्यावगाहिबोधस्तन्निष्ठविशिष्टवैशिष्ट्यावच्छिन्नजन्यताया निरुक्तान्यूनविषयकत्वपर्याप्तजन्यतावच्छेदकताकत्वाभावात्
।। व्यावृत्तानैवोपलक्षणं न तु लक्षणघटकं।। एकदेशवारणाय पर्याप्तिनिवेशः।। अत्र प्रतिज्ञात्वहेतुत्वादीनां पंचानामेवावयवत्वप
र्याप्त्यवच्छेदकतया तादृशपंचधर्मव्यापकं न्यायत्वमेव त्वाद्यवच्छिन्नविषयत्वमेवेति तादृशविषयताकान्यत्वस्य केवलप्रतिज्ञा
दिविषयकज्ञानेपि सत्वेनासंभव इत्यतो यत्किंचिद्धर्मेति।। तादृशविषयताकं यत्ज्ञानं तदन्येत्यर्थः।। एवं च प्रतिज्ञात्वावच्छिन्नविषय
ताया अवयवत्वपर्याप्त्यवच्छेदकीभूतप्रतिज्ञात्वारूपयत्किंचिद्धर्मव्यापकतया प्रतिज्ञानिता तादृशविषयताकमंत्वेन न तादृशविष

यताकान्यत्वमस्तीतिभावः॥ हेत्वादिसमुदायत्वव्यापकविषयताकभेदकूटनिवेशान्नासंभवः॥ ननु पूर्वोक्तप्रतिज्ञामात्राघटकत्व
शरीरे प्रतिज्ञात्वसामानाधिकरण्याप्रवेशान्नातिव्याप्तिप्रसक्तिरिति किं तथाविवक्षणेनेति वाच्यं॥ एवमपि तथाविवक्षणे प्रतिज्ञामा
त्राघटकत्वं संपूर्णमेव न निवेश्यमित्यभिप्रायात्॥ निष्प्रयोजनमिति गतिसैकदेशास्यतावतापि वारणात् प्रतिज्ञात्वपर्याप्त्यवच्छेद
कत्वनिवेशे प्रतिज्ञात्वमात्रनिवेशेनैव निर्वाहे शेषवैयर्थ्यं स्यादतोऽवयवत्वपर्याप्त्युपादानं॥ तेनाययमादिनिगमनांतभागेपि अतिव्या
प्तिसंगतिः॥ ननु तथापि धूमादालोकवान् पर्वत इत्यादौ धूमादिति हेत्ववयवेऽतिव्याप्तिः॥ धूमज्ञानज्ञाप्यत्वविषयकशाब्दबु
द्धित्वावच्छिन्नजन्यतानिरूपितजनकताया अपि तत्र हेतुत्वयत्किंचिद्धर्मव्यापकविषयिताकान्यज्ञानवृत्तित्वावच्छिन्नभिन्नत्वात्मेवे
हेत्ववयवसमाकारप्रतिज्ञाघटकभस्मादितिभागस्यापि दर्शितहेतुत्वानाक्रांतसेन तद्विषयकज्ञानस्य हेतुत्वव्यापकविषयताकान्य
त्वात्॥ प्रतिज्ञायाकधूमादिति भागज्ञानवृत्तिजनकतामपेक्ष्य धूमादिति हेत्ववयवविषयकज्ञानवृत्तिजनकत्वस्याभिन्नत्वात् तथा
चोक्तंगादशाधर्मश्च हेत्ववयवादिवृत्तिसमुदायत्वं तत्र च न प्रतिज्ञाद्येकदेशमात्रविषयकज्ञानविषयत्वं आनुपूर्वीसाम्येपि समुदाय
त्वस्य भिन्नत्वादिति॥ अत्रेदं चिंत्यते दीधितिकृतानेतादृशोऽभिप्रायः अन्यूनपदवैयर्थ्यात्॥ तत्पदं विनापि तत्स्थलीयहेत्वव

यत्वेऽतिव्याप्तिवारणसंभवात्॥ हेत्ववयवज्ञाननिष्ठजनकत्वस्य प्रतिज्ञाघटकधूमादिति भागज्ञाननिरूपितजनकताऽजन्यत्वादिति।
केचित्तु पर्वतत्वावच्छेदेन वह्नेः साध्यत्वे उदाहरणघटके सवह्निमान् यथा पर्वत इति भागेऽतिव्याप्तिः॥ उदाहरणघटकत्वमनिवे
श्यावयवत्वपर्याप्त्यवच्छेदकं निरूप्यता तादृशावच्छेदकं यत्तादृशभागत्वं तदुपादाय तादृशज्ञाने उक्तविशेषस्योपपादनात्॥ सामानाधि
करण्येन वह्निशाब्दबोधजनकतया ऽन्यूनपदेन वारणं चेत्याहुः॥ वस्तुतस्तु कारणत्वं कारणतावच्छेदकधर्मभेदेन भिद्यते॥ तादृश
धर्मश्चानुपूर्वीविशेष एव। एवं चावयवाघटकेत्वस्यावयवत्वपर्याप्त्यवच्छेदकत्वाद्यर्थकरणेऽपि नान्यूनपदवैयर्थ्यं॥ वह्नेः संयोगव
त्त्वे सधर्मी पर्वतः संयोगी दहनादीत्यादौ हेत्ववयववारणाय नत्वार्थक्यसंभवात्॥ अन्यथा हेतुमात्रजन्यानतिरिक्तविषयकहेतुविशेषित
हेतुत्वविषयकशाब्दबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकविषयतानिरूपकवर्णसमुदायत्वस्य हेतौ सत्वादतिव्याप्तेः॥ अन्यू
नपददानेन च तादृशशाब्दबोधस्य निरुक्तान्यूनविषयकत्वाभावान्नातिव्याप्तिः॥ तादृशान्यूनविषयकशाब्दबोधजनकतावच्छेदकत्वस्य
प्रतिज्ञाघटकभागविषयितायामेव हेत्ववयवविषयतायामसत्वान्न तादृशभागहेत्ववयवयोरानुपूर्वीभेदेन तदवच्छिन्नविषयिता
योर्भेदात्॥ तादृशेति॥ प्रतिज्ञाघटकभागज्ञाननिष्ठापं निरुक्तानतिरिक्तविषयशाब्दबोधनिष्ठजन्यतानिरूपितजनकताया अवय

वत्वपर्याप्त्यवच्छेदकयत्किंचिद्धर्मव्यापकविषयिताकान्यवृत्तित्वेपिहेत्ववयवज्ञाननिष्ठजनकतातद्भिन्नैवदहनादिलिहेत्व
वयवज्ञाननिष्ठजनकतायांदहनपदोत्तरपंचमीपदत्वरूपानुपूर्व्याएवावच्छेदकतयावह्निपदोत्तरपंचमीपदत्वरूपवन्हेरितिभागघट
त्वाउपूर्वीरूपावच्छेदकस्यततोन्यतयाकारणतावच्छेदकभेदेनकारणताभेदादितिनान्यूनपदवैयर्थ्यं॥ नन्वेतत्स्थलीयहेतुवार
णयान्यूनपदनिवेशोधर्मादालोकवानितिदीधितिविरोधइतिवाच्यम्॥ तत्रसदादिपदेनेतद्ग्रहणेतद्विरोधाभावात्॥ नन्वेत
थाप्यत्रैवप्रतिज्ञाहेत्वर्थोभयविषयकसमूहालंबनबोधस्यान्यूनातिरिक्तशब्दजनकतयाहेतावतिव्याप्तिरीश्वरे वेतिवाच्यम्॥
मुख्यविशेष्यताद्व्यानिरूपकत्वेनबोधविशेषणात्॥ यत्रात्रैवप्रतिज्ञाहेतूभयविषयकज्ञानात्कथंचित्प्रतिज्ञार्थमात्रबोध
स्तत्रप्रतिज्ञामात्रविषयितैवजनकतावच्छेदकेतिनप्रतिज्ञाहेतुसमुदायेहेतौवाऽतिप्रसंगः॥ सांप्रदायिकास्तुप्रतिज्ञाघटकभाग
साधारणहेतुज्ञानकारणतायाहेतुत्वज्ञानकारणतायाहेतुत्वव्यापकविषयतायांन्यज्ञानवृत्तित्वेनैवहेतुवारणात्॥ अन्यून
पदवैयर्थ्यमितिनशक्यंतद्दलविवक्षणीयेनादृशार्थेऽन्वयवाघटकपदस्यस्वरसतःसंपादकत्वात्॥ तादृशावच्छिन्नजन्यता
घटितस्यलक्षणांतरत्वात्॥ एतद्स्वरसेनैवकल्पांतरानुसरणादित्याहुः॥ यत्तुकेचित्शंकितेनादृशान्यूनविषयकत्वाव

५१ च्छिन्नजन्यतानिरूपितजनकताभिधाने हेतुमुपेक्ष्य प्रतिज्ञाहेतुसमुदायेऽनतिरिक्तविषयकत्वदलव्यावृत्तिदाने संदर्भ
विरोधः॥ हेत्वंतार्थविषयकशाब्दबोधनिष्ठहेतुविशेषितहेतुत्वविषयकशाब्दबोधत्वावच्छिन्नजन्यतानिरूपितजनकताव
च्छेदकविषयितानिरूपकवर्णसमुदायत्वस्य हेतोसत्वात्तत्रातिव्याप्तेः॥ अनतिरिक्तपदोपादानेन च हेत्वंतार्थविषयकशाब्दबो
धस्यातिरिक्तविषयकतया न द्वारणसंभवाच्च॥ तस्मात्संदर्भविरोधपरिहारायान्यूनविषयकत्वावच्छिन्नजन्यताविवक्षणस्या
वश्यकतयाऽवयवाघटकत्वं व्यर्थमिति तदपेक्षालंघ्वन्यूनविषयकत्वावच्छिन्नजन्यतानभिधाने कीदृशविधमादाय हेताव
तिव्याप्तिः प्रसज्यते हेत्वंतार्थविषयकसमूहालंबनबोधस्योक्तविशेषणेन वारणाद्धेत्वर्थविशिष्टावगाहिबोधमादायेति चेन्न।
उक्तविशेषणस्यातेपक्षमुख्यविशेष्यतानवच्छिन्नत्वविशेषणं प्रवेश्यतिव्याप्तिवारणस्य सुकरत्वात्॥ एवं चावयवाघटकत्वं व
ह्निमत्पदवारणायावश्यकं॥ हेतुत्वं प्रमेयं प्रमेयादित्यादौ प्रतिज्ञाहेत्वर्थबोधमादाय हेतावतिव्याप्तावपि न हेतुसामान्यस्येति।
वस्तुतस्तूपेक्षाबीजविशेषणस्यनावश्यकताहेतुमात्रातिव्याप्तेरादार्घप्रकाशानार्थत्वादिति कथमवयवाघटकत्वं व्यर्थं स्यादि
तिवदंति॥ अत्रानूनपददाने लाघवेनान्यूनविषयकत्वावच्छिन्नजन्यतानिवेशादवयवाघटकत्वव्यर्थमित्याशयेन वस्तुतस्त्वि

तियं थावतारः॥ संप्रदायमते दीधितिकाराणां पक्षतावच्छेदकविशिष्टत्वादिनिर्वचनविरोधोप्यवतारक इति बोध्यं॥

केचित्तु न्यूनानतिरिक्तविषयकशाब्दबोधनिष्ठजन्यतानिरूपितजनकतावच्छेदकविषयितेत्यत्रावच्छेदकत्वमनतिरिक्त

वृत्तित्वं बोध्यं तेनानतिरिक्तपदानुपादे न्यूनातिरिक्तविषयक[illegible]त्वं तार्थविषयकशाब्दबोधनिष्ठहेतुविशेषितहेतुत्वविष है

यकशाब्दत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकयत्किंचिद्ज्ञानविषयितानिरूपकवर्णसमुदायत्वस्य हेत्वघटवे सत्ता

नत्रैवातिव्याप्तिः कुतो नोक्तनिदूषणं समाहितं। हेतुमात्रजन्यहेत्वर्थमात्रविषयकशाब्दबोधनिरूपितजनकतावति हेतुमात्र

विषयकज्ञाने हेतुविषयितायाः सत्वेपि अन्यूनविषयकशाब्दबोधजनकताया असत्वेन तस्यास्तदनवच्छेदकत्वात्॥ अत

एव दीधितिकाराणां हेतुमुपेक्ष्य प्रतिज्ञाहेतुसमुदायेऽनतिरिक्तपदोपादानव्यावृत्तिरपि साधु संगच्छते समुदायविषयक

ज्ञानमात्रे न्यूनविषयकशाब्दबोधजनकतायाः सत्वेन समुदायविषयतायास्तदवच्छेदकतया तत्रातिव्याप्तिवारणायातिरि

क्तपदसार्थक्यसंभवात्॥ जनकत्वं वा स्वरूपयोग्यत्वं विवक्षितं न तु फलोपहितं॥ तेन प्रतिज्ञाज्ञानात्कदाचित्तादृशशा

ब्दबोधाजननेपि न तद्विषयिताया जनकतानतिरिक्तवृत्तित्वरूपावच्छेदकत्वक्षतिः॥ नन्वेकदेशमात्रविषयकज्ञानजनकता

व्यावृत्तकत्वउक्तमितिवाच्यम्॥ तथासति धूमालोकवानित्यादौ धूमादितिहेत्ववयवेऽतिव्याप्तेस्तादृशान्यूनातिरिक्तशाब्दबोधनिष्ठ
५८ जन्यतानिरूपितजनकतावच्छेदकविषयितानिरूपकवर्णसमुदायत्वस्य तत्र सत्त्वात्॥ तद्विलक्षणेन प्रतिज्ञाघटकभागज्ञानवृत्तित्वावच्छिन्नभे
दस्य हेत्ववयवज्ञाननिष्ठजनकतायामसत्त्वादिति व्याप्त्यभावात्॥ तत्र कारणतावच्छेदकधर्मभेदाभावेन कारणमायाते स्यात्॥ प्रतिज्ञा
घटकधूमपदोत्तरपंचमीत्वमपेक्ष्य हेत्ववयवनिष्ठधूमपदोत्तरपंचमीत्वमपेक्ष्य हेत्ववयवनिष्ठधूमपदोत्तरपंचमीत्वरूपानुपूर्व्या अ
भिन्नत्वात्॥ नन्वन्यूनविषयकत्वावच्छिन्नजन्यतानिवेशादेव हेत्वोर्वारणादवयवत्वपर्याप्तीत्यादि व्यर्थमिति वाच्यं॥ अनतिरिक्तविषयक
शाब्दबोधनिष्ठनिरुक्तान्यूनविषयकत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकविषयताश्रयवर्णसमुदायत्वस्य वाच्यतया प्रकृते प्रति
ज्ञाघटके हेतुसमानानुपूर्वीकभागस्यानुपूर्व्यवच्छिन्नविषयिताया अपि घटकविषयतात्वेन तादृशान्यूनविषयकत्वावच्छिन्नजन्यतानि
रूपितजनकतावच्छेदकतया तन्निरूपकवर्णसमुदायत्वस्य हेत्ववयवेऽपि सत्त्वेनातिप्रसंगसत्त्वात्॥ हेत्ववयवानुपूर्व्यपेक्षया प्रतिज्ञा
घटकनिष्ठानुपूर्व्याः भेदाभावेन तद्विषयताया ऐक्यादितः अवयवत्वपर्याप्त्यवच्छेदकेन्यस्यावश्यकत्वात्॥ अत एव तदुपादानेपीत्या
दिनाशंक्य एकदेशव्यावृत्तजनकतां निवेश्य प्रश्नाचार्यैः समाहितं न तु निरुक्तान्यूनविषयकत्वावच्छिन्नजन्यतानिरूपितजनकता तत्र ना

स्तीतिहित्वव्यवोपेक्षाबीजमसंगतं॥ हेतुमात्रविषयकत्वानेपिहेतत्त्वर्थोवगात्यन्यूनविषयकत्वाद्बोधस्वरूपयोग्यतारूप
ज्ञानजनकतासत्वादितिधेत्याअन्यूनानतिरिक्तविषयकत्वाद्बोधजनकतानतिरिक्तवृत्तिविषयितानिरूपकवर्णत्वसमनिय
तसमुदायत्वंसमुदायार्थः॥ स्वज्ञानानतिरिक्तपदानुपादानेऽन्यूनविषयकोयोयोबोधस्तज्जनकतानादृशबोधजनकतासा
मान्यंवायादृशानुपूर्व्यवच्छिन्नयत्किंचिद्विषयिताव्यापकंतादृशानुपूर्व्यवच्छिन्नविषयितानिरूपकवर्णवसमनियतत्वाद्यर्था
भिप्रायेणतदुक्तेः॥ अतएवचांतेअन्यूनविषयकत्वावच्छिन्ननिरूपितजनकतायाः हेतुप्रतिज्ञाघटकभागसाधारणानुपूर्व्य
वच्छिन्नविषयिताव्यापकत्वासंभवेपियत्किंचिद्विषयिताव्यापकत्वसंभवानादृशविवक्ष्यहेतत्त्ववयवोनवारयितुंशक्यतेइ
त्यभिधानसंगतिः॥ नहिहेतुप्रतिज्ञाघटकभागविषयितारैक्यंसंभवति॥ प्रथमविषयितायाः पदांतरविषयितानिरू
पितत्वात्॥ द्वितीयविषयितायास्तुतन्निरूपितत्वादिति॥ एतन्न्यूनापेक्षाबीजमुत्पादयितुमेवअनतिरिक्तपदोपादानेतुनवीय
नानिप्रयोजनत्वात्॥ नापिसामान्यपदार्थविवक्षातयासतितथासतिधूमादालोकवानित्यग्निग्रंथासंगतेः सामान्यानःपा
तिप्रतिज्ञाज्ञानत्वावच्छिन्नजनकतायाहेत्ववयवहृत्यविषयिताव्यापकत्वाव्यापकत्वात्॥ अनतिरिक्तवृत्तित्वरूपमन्वोदक

५९ त्वं तत्त्वं नास्ति तदपि वा नास्ति स्वरूपसंबंधरूपमेव तन्निविष्टं॥ एतेन तदपि प्रत्युक्ता तत एवेत्याद्युपष्टंभकाभिधानं॥ तत्राद्ये हेत्वर्थविशिष्ट
वैशिष्ट्यं बोधजनकतायाः प्रतिज्ञाहेत्वाद्यर्थवृत्तिविषयिताव्यापकत्वेपि अन्यूनातिरिक्तबोधजनकतायां प्रतिज्ञानुपूर्व्यवच्छिन्नवि
षयिताव्यापकत्वसद्भावेन तादृशविषयितासमनैयत्यान्नातिव्याप्तिः॥ द्वितीयपक्षे तु अंतिमान्यूनविषयकत्वावच्छिन्नजन्यत्वानवे
शान्निराकरणग्रंथो हेयः॥ हेत्ववयवविषयितायास्तादृशजनकतानवच्छेदकत्वात्॥ यद्वा हेतुपेक्षाबीजं प्राग्वत्॥ अनतिरिक्तपदोपादा
ने तु अन्यूनातिरिक्तविषयकशाब्दबोधजनकतानतिरिक्तवृत्तिविषयितानिरूपकवर्णत्वव्यापकसमुदायत्वमेवार्थः॥ अनतिरिक्तपदा
नुपादाने च प्रतिज्ञाहेतुजन्यबोधमादाय वाक्ये नातिव्याप्तिरतस्तन्निवेशः॥ यद्यपि तदुपादानेपि प्रतिज्ञामात्रजन्यशाब्दबोधजनकताप्रति
ज्ञाहेतूभयविषयिताव्यापिकेति पुनरतिव्याप्तिस्तथापि एतदेवाययमादिनिगमनांतातिव्याप्तिवारणफलकत्वं अनतिरिक्तपदस्य॥ हे
त्वंशवारणं तु तादृशसमुदायत्वनिष्ठन्यूनवृत्तित्वानिरूपकनिवेशादेवेति भट्टाचार्याणां समनैयत्याभिधानं च यथाश्रुताभिप्रायेणेति
प्रतिभाति॥ नन्वयवत्वं न्यायांतर्गतत्वघटितं तत्पर्याप्त्यवच्छेदकं च न पर्वतो वह्निमानिति वाक्यतस्योदासीनसाधारण्यात्॥ किंतु नत
द्वाक्यत्वं तथा च न तत्प्रतिज्ञाविषयतानामेव तन्व्यापकत्वात्॥ तन्निरूपकान्यज्ञानवृत्तित्वस्योदासीनज्ञानसाधारणकारणतायां सत्वा

दसंभव इत्यत आह ॥ अवयवत्वंचेति ॥ प्रतियोग्यघटकत्वदलसत्त्वेन धूमादित्येकदेशसमुदायत्वेऽप्यावयवत्वपर्याप्त्यवच्छेदकत्वेपि तद्व्याप्तिः ॥
नयोदासीनवाक्यवृत्तिविषयतायाअपितादृशानुपूर्व्यवच्छिन्नविषयतात्वेन व्यापकत्वसंभवान्न्यायांतर्गतत्वोपादानेपि नक्षतिरिति वाच्यम् ॥
एकदेशविषयतायाविषयतात्वेन प्रतिज्ञाघटकधूमादितिभागविषयतायावातादृशानुपूर्व्यवच्छिन्नविषयतात्वेन व्यापकत्वादतिप्रसंग ॥
इति स्वविषयतात्वेन व्यापकत्वनिवेशात् वाक्यभेदेन विषयताभेदात् केचित्तु तादृशजनकतायामेवाक्यघटकत्वं । तच्च तादृशबोधवृ
त्तियत्किंचिज्ज्ञानजन्यतान्यज्ञानवृत्तिजन्यताऽनिरूपकत्वं प्रतिज्ञैकदेशधूमादिपदज्ञानवृत्तिजनकतायातादृशजन्यताऽन्यधू
मविशिष्टहेतुत्वमात्रज्ञानवृत्तिजन्यतानिरूपकत्वान्नातिप्रसंग इति प्राहुः ॥ नन्वेवमग्रेपक्षतावच्छेदकविशिष्टसाध्यतावच्छेदकविशि
ष्ट्यावगाहित्वमित्यन्यूनविषयकत्वनिर्वचनविरोध इत्यत आह वस्तुतस्त्विति ॥ विशेष्यदलेति ॥ उभयघटकेत्यादिदलेऽर्थः ॥ प्रकृ
तानुपयुक्तत्वमिति ॥ तथाचावयवाघटकेत्यपि व्यर्थमेव ॥ परंतु इदानीं उभयघटकेत्यादिदलवैयर्थ्यकथनेन व्याप्तिः संभवतीति
अवयवाघटकत्ववैयर्थ्यसंभवेति तत्कथनमिदानीमनुपयुक्तं तदकथनेपि व्याप्तिसंभवादित्यर्थः ॥ अदितिः पुत्रवतीत्यादौ दि
तिपुत्रवतीत्याद्येकदेशवारणायसमानेति ॥ रमेश्वरः पूज्यः सौदामिनीद्रव्यमित्यादौ रमेश्वरः पूज्यः दामिनीद्रव्यमित्यादि ॥ तथा

६० विधबोधजनकतावच्छेदकत्वेन वह्निव्याप्यविषयविषयिणां निवेशयं दूषयति॥ प्रतिज्ञेति॥ यदि मेश्वरः पूज्य इति वाक्यात् तादृशबोधो
जायतामिति तच्छायामपि परमेश्वरः पूज्य इति प्रतिज्ञा न प्रतिज्ञातार्थस्य शंकां निराचष्टे॥ कथंचिदिति॥ न्यायत्वानंगीकारादिति॥ तथा
चावयवघटकत्वं व्यर्थमेवेति भावः॥ ननु तन्यरत्वानिवेशे तन्त्वार्थ्यं स्यादित्यत तत्परस्यावश्यकतामाह॥ अप्रकृतार्थपरेति॥
तानार्थकहर्यादिपदघटितं लक्षणया जलाद्यर्थकवन्ह्यादिपदघटितं च बोध्यम्॥ प्रतिज्ञाघटकहेतुसमानार्थभागेत्यर्थः॥ तथा
चान्यूनानतिरिक्तविषयकेत्यादि निरुक्तो तादृशविषयकत्वावच्छिन्नजन्यत्वोपादानस्यावश्यकतयानतिरिक्तविषयकत्वानुपा
दाने न कुत्रापि हेत्वावति व्याप्तिरित्यर्थः तत्तद्भागेत्यस्य तत्तद्धेत्विति वार्थः॥ एतच्च प्रतिज्ञाद्यघटकत्वकथनं निरुक्तान्यूनविषयकत्वा
वच्छिन्नजन्यतानिवेशलाभायैव॥ तत्रपर्याप्त्य निवेशान्नानतिरिक्तत्वपदवैयर्थ्यमिति भावेन॥ अन्यूनविषयकबोधवृत्तिजनकता
निवेशेन च तादृशप्रतिज्ञार्थबोधवृत्तिहेतुविशिष्टहेतुत्वबोधत्वावच्छिन्नजनकतामादाय हेत्ववयवे हेतुविशिष्टहेतुत्वविशिष्टसा
ध्यमात्रबोधत्वावच्छिन्नजनकतामादाय निगमने चातिव्याप्तिः स्यादित्यर्थः सर्वमभिधेयं प्रमेयमिति दीधितिरुदुक्तः सर्वपदवै
यर्थ्यशंकते॥ यद्यपीति॥ अनुमितिविषयातिरिक्ताविषयकत्वस्य यत्किंचिदनुमितिर्विषयत्वाभाववन्निष्ठविषयताकत्वस्या

नुमितेर्विषयत्वं यत्र यत्किंचित्तदभाववन्निष्ठविषयताकत्वस्य वाऽभावरूपत्वे विषयतायाः॥ स्वरूपसंबंधरूपत्वेनासंभव
इति न तत्सामान्याभावनिवेशे सर्वपदवैयर्थ्यमित्यर्थः॥ केवलेति॥ अभिधेयत्वसामानाधिकरण्येन तत्तदभिधेयेनानुमितिसं
भवेपि नादृशानुमितिविषयत्वसामान्याभावस्याप्रसिद्धिरित्यर्थः॥ स्फुटीकर्तुं सामान्याभावपर्यंतताविवक्षणेपि शिष्येण ग्राहयि
तुं॥ सर्वमभिधेयमित्यत्राभिधेयपदप्रयोजनमाह॥ सर्वेभ्य इति। पुत्रपौत्रादिस्वर्गपश्वादिसर्वफलोद्देशेनेत्यर्थः॥ कर्तव्या
विति शेषः॥ प्रक्रांतेति। शब्दवाक्यजन्यशाब्दबोधविषयत्वं पूर्वोपस्थितत्वं वा प्रक्रांतत्वं। यद्यपि मिलितानां तावत्फला
नां दर्शपौर्णमासकर्तव्यताप्रयोजककामनाविषयत्वं सर्वपदेन मिलितत्वेन फलानुपस्थापनात् ऽ तथापि यावद्धर्मावच्छिन्ना
ऽ प्रक्रांताः प्रत्येकं तावद्धर्मावच्छिन्नानामेवोपस्थितौ वाक्यभेदप्रसंग इति तावत्समुदायत्वरूपसर्वत्वेनोपस्थितिमात्रं
फलत्वानुमानस्वीकृतेति बोध्यं॥ उद्देश्यतावच्छेदकव्यापकसर्वत्वेनान्वयासंभवसूचनाय रूविपर्ययेति विधेयव्याप्यत्वं॥
व्यभिचारितासंबंधेन विधेयशून्यत्वं॥ उद्देश्यतावच्छेदकव्यापकसर्वत्वमात्रबोधकत्वे सर्वोपि घटः सुंदर इति प्रयोग
प्रसंगः निखिलघटवृत्तिसर्वत्वस्य घटत्वव्यापकत्वादिति विधेयव्याप्यत्वमुक्तं तथा च तत्र सौंदर्यव्याप्यत्वाभावान्न

६१ नत्प्रयोगः॥ एवं व्याप्यत्वमात्रोक्तौ घटचतुष्टयमात्रवृत्तिसर्वत्वमादाय दर्शितप्रयोगप्रसंगतादवस्थ्यमिति। उद्देश्यतावच्छेदकव्याप
कत्वनिवेशः॥ तादृशसर्वत्वस्य वोद्देश्यतावच्छेदकघटत्वाव्यापकत्वान्नोक्तापत्तिः॥ प्रकृते वाभिधेयपदसमभिव्याहृतसर्वपदस्याभि
धेयत्वव्यापकसर्वत्वबोधकत्वमुक्तं च्युत्पत्तेरिति जगन्मात्रवृत्तिसर्वत्वमेवाभिधेयत्वव्यापकं न तु कतिपयमात्रवृत्तिसर्वत्वमिति तादृशस
र्वपदस्य न कतिपयवृत्तिसर्वत्वबोधकत्वमिति भावः॥ यद्यपि सर्वं गगनं शाब्दवदिति व्यवहारवारणाय तद्धर्मसमानाधिकरणभेदप्र
तियोगित्वमपि प्रवृत्तिनिमित्तशरीरे प्रवेश्यं भेदश्च सामानाधिकरण्यनिरूपकत्वाभयसंबंधेन प्रतियोगितावविशिष्टान्योन्याभावः॥ तेन नद्वि
त्वाद्यवच्छिन्नभेदसत्वेपि न क्षतिः॥ एकधर्मपरित्यज्य चनापरधर्मावच्छिन्नतात्पर्येण तादृशप्रयोगः॥ तथापि तद्धर्मव्यापकविधेयव्याप्य
पर्यामिकधर्मत्वेन प्रवृत्तिनिमित्तत्वपक्षएव तत्प्रवेशः॥ नत्वेतत्पक्षइत्याशयः॥ द्वेधानुमितिविषयतानिवेशे गौरवादाह त्वेतिसंशाब्द
बोधः॥ अनुमितिविषयताव्यापकत्वसंपत्तये प्रकृतेति॥ समूहेति॥ पर्वतो वन्हिमान् सर्वं प्रमेयमित्याकारकेत्यर्थः॥ समूहालंबनशाब्द
बोधविषयतायास्तत्समनैपत्येप्याह॥ वाक्यांतरसहितत्वदिति॥ यत्किंचिदिति॥ असमूहालंबनाप्रकृतानुमितिः॥ यदिति॥ प्रतिज्ञा
जन्यशाब्दबोधसामान्यपरं तेन तत्तच्छाब्दबोधविषयतायाः परामर्शजन्यतावच्छेदकविषयतात्वाव्यापकत्वेपि न क्षतिः॥ तादृशापरा

मर्शजन्यतावच्छेदकविषयताव्यापकतावच्छेदकस्वनिरूपकवृत्तिविषयतात्वकत्वोक्तौ वाऽऽकैकत्वाद् बोधपरं॥ इदं तु चिंतितपराम
र्शे वैशिष्ट्यस्यैव कार्यतावच्छेदकत्वं न तु विषयविषयकत्वस्यापि तत्र प्रवेशः॥ यत्तु पक्षताकार्यतावच्छेदकविषयतात्वेन समनैयत्यमिति तत्
त्राधूमलिंगकत्वाविरहविशिष्टसिद्धिविशिष्टान्यानुमितित्वस्यैव तत्कार्यतावच्छेदकत्वात् तत्रापि तदप्रवेशात्॥ बाधाभावजन्यतावच्छे
दकविषयतात्वेन समनैयत्यमिति केचित्॥ वस्तुतस्तु व्याप्यवत्तापरामर्शत्वेति लिखनस्वरसात् व्यापकसामानाधिकरण्यस्य
व्याप्तित्वे हेतुतावच्छेदकधर्मसंबंधभेदेपि स्वावच्छिन्नव्यापकसामानाधिकरण्य स्वाश्रयत्वोभय त्वोभयसंबंधेन धर्मवत्त्वं
व्याप्यत्वमनुगतं॥ साध्याभाववदवृत्तित्वस्य व्याप्तित्वे च हेतुतावच्छेदकसंबंधान्य हेतुप्रतियोगिकसंबंधानवच्छिन्नत्वस्यप
रिचापकतया हेतुतावच्छेदकसंबंधविषयतायाः कारणतावच्छेदककोटिनिवेशेप्रयोजनानावान्नकोपिदोषः इति। सकला
भिधेयेत्यनेन गगनस्यापि संग्रहः॥ विरवस्यैवेति॥ व्याप्ति घटकीभाववत्वादीनामपि अभिधेयत्वेनानुमितौ नानुप्रकार
त्वमिति सूचनाय दृष्टांतकथनं किं वत्ता न्वपनुरोधे नन्वेत्सर्वत्रापि साध्ये पक्षनिष्ठाभावप्रतियोगित्वधिरेव बाधस्तदावि
शेषणानवच्छिन्नेति विशेषणपदं अवच्छिन्नत्वस्य सामान्याभावत्वाश्रयतिषां अभावत्वादीनां॥ ननु निरवच्छिन्नप्रका

६२ रकत्वातासमनेयत्वनिवेशपक्षेऽत्यंताभावाप्रतियोग्याकाशाभाववत्वेनपक्षत्वेपिउपनयातिव्याप्तिसंभवात्सकलाभिधेयनिष्टे
तिव्यर्थमेवं॥केवलविषयतानांसमनेयत्वपक्षेप्युपनयातिव्याप्तिंवक्तुंतदुपादानं॥प्रमेयत्वानुषंगत्यागबीजमहाद्रव्यमिति। अ
न्यूनविषयकत्वं॥अनुमितिविषयताव्यापकविषयताकत्वंसमनेयत्वघटकं॥ननुनिरवच्छिन्नप्रकारतानांसमनेयत्वनिवेशपक्षे
कथमुक्तोपनयेतिव्याप्तिः॥तस्यव्याप्तिबोधकत्वेनतद्घटकहेतुसामानाधिकरण्यसाध्यसामानाधिकरण्यघटकाधिकरणानांहे
त्वधिकरणत्वेनसाध्याधिकरणत्वेनैवनिवेशेतादृशाधिकरणत्वस्याधिकरणतात्वस्यवास्वरूपतउपनयजन्यबोधेभानानुमितौत्वभा
नेननिरवच्छिन्नप्रकारतासमनेयत्वाभावादित्याशंकांसाध्येनसाधनेनैवचाधिकरणप्रवेशस्वीकृत्यनिरस्यतिव्याप्तीति॥अत्रसकला
भिधेयनिष्ठात्यंताभावाप्रतियोग्याकाशाभाववदिदंद्रव्यमित्यत्र।अनुमितौद्रव्यत्वंस्वरूपतोनप्रकारःसाध्यतावच्छेदकरूपेणैवप्रका
रत्वादित्याशयेनेदंत्वानुक्तं॥साध्यतावच्छेदकरूपेणैवप्रकारत्वाकीभूतद्रव्येतरावृत्तित्वघटकतयास्वरूपतोद्रव्यत्वंभासनेऽपिद्रव्यं
हेतूकृतं॥द्रव्यत्वंनहेतुःसिषाधयिषयान्यायप्रयोगापत्तेः॥कथितेति।अनुमितौस्वरूपतोगुणत्वाद्यभानेनउपनयबोधेतथातज्ज्ञाने
नातिव्याप्तेरलग्नकतापत्तिरिति भावः॥उपक्तोपनयेऽतिव्याप्तिंनिरसितुंशंकते॥ नन्वेति॥एवंचानुमितिविषयत्वोपनयजन्यबोधविष

यत्वयोर्निरूप्यनिरूपकभावभेदेनइतिनसमनैयत्यमिति नातिव्याप्तिरिति भावः॥ हेत्वर्थेति॥ धूमादालोकवान् पर्वतो वह्निमान् धूमादित्या
दिन्यायस्थलीयहेतुजन्ये त्यर्थः॥ अन्यूनेति निगमनार्थबोधस्य सर्वस्यापि अनुमितिविषयताशालित्वे बाधकाभावादन्यूनविषयकत्व
मात्रोपादाने निगमनवारणसंभवात् अनतिरिक्तविषयकत्वमावश्यकमित्याशयेनान्यूनविषयकत्वमात्रवैयर्थ्याभिधानं बोध्यम्॥ प्रतिज्ञार्थ
समूहालंबनमादाय हेत्वंतवारणाय चानतिरिक्तविषयकत्वसार्थक्यं बोध्यं॥ समूहेति॥ हेतुजन्यबोधमादाय दीधितिरीत्याऽतिप्रसंगं
दर्शयितुं समूहालंबनानुधावनं॥ अनतिरिक्तविषयकत्वोपादानेपि प्रतिज्ञाजन्यबोधं हेतुविषयकत्वावच्छिन्नजन्यताकमादाय दोषोऽस्त्वीति
तत्यागः॥ प्रकृतेति॥ यद्यपि यत्किंचिदनुमितिविषयतात्वसमव्यापकस्वविषयितात्वकत्वे वैयर्थ्यं हेतुप्रतिज्ञार्थसमूहालंबनमादाय हेत्वंतवार
णायानतिरिक्तविषयकत्वस्यावश्यकत्वादित्येतदारंभो व्यर्थस्तथापि समूहालंबनानुमितिशाब्दबोधावादाय धूमादालोकवानित्यादौ हेता
वतिव्याप्तिस्तुदुपेक्षितं॥ असंभवः पूर्वोक्तसमूहालंबनानुमितिमादाय॥ न्यूनताभंगाय न्यूनविषयकत्वव्याख्या बीजं पूरयति॥ उपनये
ति॥ दोषद्वयमपि यथाश्रुतनिष्कृष्टानतिरिक्तविषयकत्वकल्पयोर्बोध्यम्॥ हेत्ववयवजन्यबोधविषयतायाआलोकाद्यवृत्तित्वात् धूमा
दालोकवानित्यादिप्रसिद्धहेत्ववयवोपेक्षा॥ पूर्वोक्तसमूहालंबनबोधमादाय दूषणांतरमाह॥ एवमिति॥ प्रमेयादित्याकारकहेतुवा

६३ क्यघटकप्रमेयइत्येकदेशोइत्यर्थः॥ प्रमेयादित्यादाविति हेत्ववयवइत्यनेनान्वयः॥ प्रतिज्ञार्थबोधमादाय दोषस्तु फलोपधाननिवे
शेपि सुवार इति समूहालंबनानुधावनं प्रतिज्ञाजन्यबोधहेत्वर्थविषयकत्वावच्छिन्नाजन्यतावर्त्तते इति द्योतनायेत्यन्ये॥ तज्जन्यबो
धे च पंचम्यर्थे प्रमेयभाने प्रमेयत्वस्यापि भानेन साध्यतावच्छेदकीभूतप्रमेयत्वत्वविशिष्टप्रमेयत्वत्वविशिष्टप्रमेयत्वरूपसाध्य
स्य प्रमेयरूपपक्षेवैशिष्ट्यावगाहिबोधजनकत्वस्य प्रमेयादिति वाक्यघटकप्रमेयेति भागे सत्वान्नुवत्स्यति व्याप्तिरिति भाः॥ वस्तुत
स्तु तादात्म्येन प्रमेयस्य साध्यत्वे प्रमेयादिति हेतावति व्याप्तिः॥ अन्यूनविषयकत्वदले संबंधानिवेशस्य वक्ष्यमाणत्वात्॥ ननु हेतु
जन्यबोधस्य प्रमेयांशे निर्धर्मितावच्छेदकतया किंचिद्धर्मावच्छिन्नविशेष्यकत्वनिवेशस्यापि हेतावति व्याप्तिः॥ शक्यते वारयि
तुमित्यतः स्थलांतरे व्याप्तिमाह॥ किंचिदिति। घटान्यत्वकपाले वर्त्ततेनत्र कपालरूपं घटश्च वर्त्तत्येएवस्वरूपसमवायोभ
यमयघटितसांपानांधिकरण्य संबंधेन घटान्यत्वविशिष्टंघटरूपान्यतरत् कपालीयरूपघटान्यतरदेवताहशान्यतरत्वा
वच्छिन्नतानतास्यघटान्यत्वस्य सामानाधिकरण्यसंबंधेन पक्षतावच्छेदकघटकत्वं॥ बाधवारणाय समवायस्वरूपघटित
सामानाधिकरण्यस्य साध्यताघटकसंबंधत्वं॥ साध्यतावच्छेदकसंबंधेन प्रकृतसाध्यावगाहित्वपर्यंतसत्वेपि व्याप्तिदाना

यवक्ष्यमाणानतिरिक्तविषयकत्वरक्षणायचतस्यहेतुघटसंबंधत्वं॥ स्वरूपासिद्ध्यादवारणायनस्यैवहेतुताघटकसंबंधत्वंवो
क्तं॥ तादृशहेतुमेवदर्शयति ऽरूपघटान्यतरत्वावच्छिन्नांशेऽति॥ हेत्ववयवेघटान्यत्ववद्रूपघटान्यतरस्यादित्यादौ॥ ननुके
वलरूपघटान्यतरस्यैवसामानाधिकरण्यसंबंधेनहेतुत्वमस्त्वित्याशंक्य घटादिरूपस्याप्यन्यतरांतर्गततयासामानाधिकर
ण्येनतस्यघटत्वादौसत्वेनव्यभिचारमाह॥ घटत्वादाविति॥ घटान्यत्वरूपविशेषणप्रवेशेचतद्वैशिष्ट्यं कपालरूपस्यैवतस्य
सामानाधिकरण्यसंबंधेनघटत्वादावसत्वान्नव्यभिचारः॥ ननुघटान्यत्वविशिष्टरूपस्यैववास्वरूपसमवायोभयघटित
सामानाधिकरण्यसंबंधेनहेतुताऽस्तुकिंविशेष्यदलप्रवेशेनेत्यतआह॥ धर्मिभेदेनेति॥ रूपभिन्नस्य घटस्यापिप्रवेशेने
त्यर्थः॥ विशेष्यस्वरूपघटान्यतरस्यघटमात्रविशेष्यत्वेघटान्यत्वं व्यर्थं॥ रूपमात्रमात्रविशेष्यत्वेपक्षविशेष्यकत्वनिवेशा
नापिवारणंसंभवतीत्यस्त्वन्यतरदुपात्तम्॥ तथाचव्यभिचारावारकत्वेपिवन्हिमान्वन्हिमादन्यान्वेरितिवद्धर्मिभेदान्नवैयर्थ्यमि
त्यर्थः॥ घटान्यत्वंतुनहेतुनहेतुः सिषाधयिषायाअनुसरणापत्तेः॥ ननुसामानाधिकरण्येनघटान्यत्वविशिष्टस्यैवहेतुत्वमस्तु
एवंचरूपघटान्यतरस्यैवघटान्यत्ववैशिष्ट्येनरूपेणहेतुत्वसंभवेकिमन्यतरत्वेनरूपेणहेतुत्वेनेत्याशंकांतथामातिसभायाअ

पिकपालांतर्भावेण घटान्यत्वविशिष्टतयानस्यानुघटत्वविशिष्टतयातस्यानुघटत्वघटरूपादौ सत्वेन व्यभिचारः स्यादितिम
नसि कृत्य परिहरति॥ घटान्यत्वेविध गन्यत्वविशिष्टस्यैव हेतुत्वेतु सामानाधिकरण्य संबंधेनापि न घटरूपादौ व्यभिचार इत्युप
लक्षितस्य हेतुत्वं बोध्यं॥ विशिष्टहेतुकेवनप्रयोजनमितिनत्यागः॥ विशेष्यतावच्छेदकस्य रूप घटान्यतरत्वरूपस्य वृत्तीति॥
सामानाधिकरण्य संबंधेन साध्यत्वे व्याप्तिरेव न संभवति तस्य वृत्यनियामकतया हेतुसमानाधिकरणाभावीयतत्संबंधावच्छि
न्नप्रतियोगित्वाप्रसिद्ध्येरित्युदाहरणाभावान्न्याय इत्याशयः॥ साध्यतावच्छेदकसंबंधेन प्रतियोगिवैयधिकरण्यघटिता
याव्याप्तेर्निष्कृष्टतयातत्कल्पे उदाहरणं संभवतीत्याशयेनाह॥ व्यापकत्वाघटकत्वेइति॥ विशेष्यतावच्छेदकतापर्याप्तिपर्यंत
व्यावृत्तिदानायाह॥ वन्हिमदिति॥ पक्षमुख्यविशेष्यतानिविष्टेत्याशयः हेत्ववयवे हेत्ववयवैकदेशे॥ ननु नित्यावृत्तिधर्मत्वर
न्यत्वादित्यस्यैव समक्तेद्व्यपदमनर्थकं॥ एवं वन्हिमदवृत्तिधर्मत्वरन्यत्वादित्यस्यैव सम्यक्त्वे पर्वतपदमनर्थकमित्यत आ
ह॥ अखंडेति॥ प्रमेयाद्वान्यत्ववदिति॥ अत्रावाच्यस्यैव साध्यत्वं न तु वाच्यत्वस्य तथासति जन्यत्वपक्षकोक्तसाध्यहेतुस्थले इत्य
नेन वाच्यत्वसाध्यकस्थलस्यैव परामर्शेतत्स्थलीयहेतौ व्यावृत्तिदानासंगतिः स्यात्॥ प्रमेयादित्यत्र प्रमेयपदस्य लक्षणया

प्रमेयज्ञानबोधकतया वाच्यत्वबोधकत्वासंभवात्॥ वाच्यस्य साध्यत्वे तु प्रमेयज्ञानस्यापि वाच्यतया साध्यबोधकत्वं संभवती
ति भावः॥ अत्र प्रमेयाद्वाच्यत्वसमानाधिकरणधर्मः साध्यः॥ अन्यथा हेतैकवाक्यतांभावेन न्यायानवतारात्॥ प्रमेयाद्वाच्यत्व
वदित्यत्र पाठे वाच्यत्वे प्रमेयादित्यस्यान्वयेपि न हत् तादात्म्यसंबंधेन साध्यं तत्रैव च हेतुवाक्यार्थान्वय इति तादृशधर्मस्य साध्यत्वा
नुपगमेपि न क्षतिरित्यपि संभवति॥ पक्षतेति। प्रमेयहेतुत्वं प्रमेयं प्रमेयादित्यादौ हेतुवारणाय निरूप्यनिरूपकभावनिवेशः॥
नन्वत्र साध्यतावच्छेदकवैशिष्ट्यनिवेशो व्यर्थः॥ स्वरूपसंबंधेन वाच्यसाधकस्थले हेतावतिव्याप्तिवारणाय साध्यतावच्छेदकसंबंधे
न साध्यप्रकारतायाएव निवेश्यत्वात्॥ नचोक्तसंबंधनिवेशेपि पंचम्यर्थे प्रकृत्यर्थस्य निरूपितत्वसंबंधेनैवान्वयाज्जेन संबंधेन
प्रमेयाद्वाच्यसाधके प्रमेयादिति हेतावतिव्याप्तिः॥ तस्य प्रकृतपक्षे साध्यतावच्छेदकीभूतानिरूपितत्वसंबंधेन साध्यवत्वबो
धकत्वादिति साध्यतावच्छेदकनिवेश आवश्यक इति वाच्यम्॥ नत्संबंधस्य वृत्त्यनियामकतया तत्संबंधावच्छिन्नप्रतियोगित्वाप्र
सिद्ध्या न्यायस्यैवाऽभावादित्याशंकां निरस्यति॥ संबंधविशेषश्चेति॥ प्रकृत्यर्थः॥ साध्यं न तु ज्ञाप्यत्वं प्रमेयं प्रमेयत्वादित्यादौ
स्वरूपसंबंधकालिकविशेषणताभ्यां साध्यसाधनभावे केतावतिव्याप्तिः॥ न च स्वरूपासिद्धिः विषयतायाअनित्यत्वात्॥ समा

नकालीनत्वस्यसाधनताघटकसंबंधत्वाद्धेतसाध्यतावच्छेदकसंबंधनिवेशआवश्यक इतिचेन्न।उत्तरदलासत्त्वात्॥ नन्वुक्त
६५ स्थलीयहेतौसाध्यतावच्छेदकवैशिष्ट्यनिवेशाव्यावृत्तिर्नसंगच्छतेयतः प्रमेयादित्यत्रप्रमेयपदंलक्षणयाप्रमेयज्ञानपरंजन्यज्ञा
नविषयत्वंपंचम्यर्थस्तदेकदेशेजन्यत्वेप्रमेयज्ञानरूपसाध्यवैशिष्ट्यबोधकत्वेपिपक्षतावच्छेदकीभूतविषयतात्वावच्छिन्नेसाध्य
वत्त्वाबोधकत्वादित्याशंकते॥ यद्विति॥ परंपरासंबंधेनस्वजन्यज्ञाननिरूपितत्वसंबंधेन॥ व्यावृत्तिरिति। केचित्तु पूर्वंप्रमेयाद्धान्य
त्वमेवसाध्यंप्रमेयादित्येवहेतुस्तत्रप्रमेयपदस्यप्रमेयज्ञानपरत्वेपिधर्मिपारतंत्र्येणप्रमेयस्यजन्यत्वेप्यन्वयइत्यभिप्रेत्येदमित्याहुः॥
इतरेति॥ साध्यस्यर्थः॥ पक्षतावच्छेदकेविशेष्यतावच्छेदकतापर्याप्तिसत्त्वेनेदं॥ तद्भिन्नत्वेनपक्षनिष्ठविशेष्यताभिन्नत्वेन॥ प्रकारता
याविषयतान्यत्वनियमात्॥ तादृशेति॥ पक्षतावच्छेदकप्रकारतानिरूपितविशेष्यतायाअतिरिक्तत्वमनेनतद्भेदोपिनिवेश्य। अन्यूनविष
यकत्वावच्छिन्नजन्यतायांतादृशमुख्यविशेष्यकत्वानवच्छिन्नत्वंवानिवेश्यं॥ पूर्वमनतिरिक्तविषयकत्वानुपादानेऽयंपदानुषंगपक्षे
निगमनेव्यावृत्तेरुक्तत्वादिदानींतन्निवेशोपितद्दोषतादवस्थ्यमेवस्यात्॥ तादवस्थ्यादिति॥ ननुप्रकारतावच्छेदकतापर्याप्तिनिवेशान्नि
गमनव्यावृत्तिरित्यतआह॥ अन्यूनेति॥ निगमनवारकंप्रकारांतरमप्युन्निरस्यति एतेनेतिअनंतःपातित्वं॥ अघटकत्वंस्वविषयेताशरन्य

प्रतीतिरित्तितद्विषयिताकत्वं अव्यापकत्वमितियावत्। तद्विषयितायाः तथात्वात्॥ अनंतपातित्वात् जन्यतानवच्छेदकत्वाच्च॥ नन्वतादृश
विषयताशून्यत्वस्यतादृशप्रतिज्ञाजन्यबोधस्यैवस्वरूपयोग्यतामादायहेतावतिव्याप्तिरितितादृशावगाहित्वात्मकान्यूनविषयकत्वावच्छि
न्नजन्यतानिवेशः अवश्यक इति वाच्यं॥ जन्यतायांगुरुतरतादृशावच्छिन्नत्वनिवेशमपेक्ष्यलाघवेनतादृशविषयतामवच्छिन्नत्वनिवेशेनै
वविषयतातेनमुख्यविशेष्यत्वावच्छिन्नजन्यताकहेतुवारणसंभवात्॥ यथासन्निवेशोऽवैयर्थ्येपितद्दलस्यअनतिप्रयोजनकतयान्यूनतानु
द्धारादिति॥ यत्रसकलाभिधेयवृत्तिधर्मवदित्यादौविलक्षणेति॥ वैलक्षण्यंनिरवच्छिन्नंतथाचतादृशविषयतानिरूपितनिरवच्छिन्नावच्छेदकत्व
शून्यधर्मनिष्ठनिरवच्छिन्नावच्छेदकताकविषयताशून्यत्वमर्थः॥ प्रमेयावच्छिन्नविषयवारणायद्वितीयवैलक्षण्यनिवेशः॥ नन्वतादृशधर्म
निष्ठनिरवच्छिन्नविषयताशून्यत्वमेवास्तु॥ पर्वतत्वप्रकारतानिरूपितविशेष्यतामादायासंभवात्॥ धूमादालोकवानित्यादिस्थलीयनिगमने
व्याप्त्यादिविषयतासत्वादाह॥ द्रव्येति॥ नैगमनेबोधेअबाधितत्वादिभानंनास्तीत्याशयेनेदं॥ नचनिगमनवारणायतथाविधविषयतावच्छे
दकतान्यावच्छेदकताकविषयताशून्यत्वमेवास्तुधूमव्यापकतावच्छेदकत्वावच्छिन्नवह्नित्वविषयतायास्तादृशद्रव्यत्वविषयतान्यत्वादिति
वाच्यम्॥ अन्यूनविषयकत्ववैयर्थ्यात्॥ उक्तेति॥ धूमादालोकवानित्यादिस्थलीयेत्यर्थः॥ यदिविषयविशेषेप्रतिज्ञाजन्यबोधानांनसर्व

संशयविरोधिविषयतातदाताद्दशनिश्चयानिवर्त्यसंशयप्रसिद्धेराह॥इत्थंचेति॥नान्यूनपदव्यावृत्त्यसंगतिरिति॥अत्रेदं बोध्यं॥पक्षताव
च्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्नप्रकारतानिष्ठावच्छेदकताकप्रतिबंधकतानिवेशनेधूमादालोकवान्पर्वतोवह्नि
मानितिप्रतिज्ञायामव्याप्तिः हेतुत्वंधूमीयंनवेत्यादिसंशयस्यतन्निरूपितप्रतिबध्यताशून्यत्वात्॥उत्तरकल्पेचपर्वतोवह्निमानित्यादिप्र
तिज्ञायामपि॥पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निसंबंधावच्छिन्नप्रकारतानिष्ठावच्छेदकताकप्रतिबंधकतायाएवलक्षणघटकतया
संबंधोवह्निमात्रवेतिसंशयस्यतन्निरूपितप्रतिबध्यताशून्यत्वात्॥एवंसाध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्न
विशेष्यत्वावच्छिन्नप्रतिबंधकत्वाद्युपादानेप्यूह्यं॥ एतादृशदोषवारणायैवव्यापकत्वंरूपमवच्छिन्नत्वंनिवेश्यंनत्वंन्यूनपदव्यावृत्त्यसंगति
परिहारायेति॥अथदीपितीकारोक्तान्यूनपदव्यावृत्त्यसंगतावपिनक्षतिः॥धूमादालोकवानित्यादौप्रतिज्ञाहेतुभयार्थबोधनिष्ठहेत्वर्थविषयक
त्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकविषयितानिरूपकवर्णसमुदायत्वमादायहेतुमात्रेऽतिव्याप्तेर्वारणायस्वयमन्यूनविषयकत्वा
वच्छिन्नजन्यतानिवेशलाभार्थतयातत्पदोपादानस्यवक्तव्यत्वादितिचेन्न॥एवमपिस्वरूपसंबंधरूपप्रतिबंधकतावच्छेदकतानिवेशनेधूमा
दालोकवान्पर्वतोवह्निमानित्यादिप्रतिज्ञायामव्याप्तेर्दुर्वारत्वात्॥निरुक्तावच्छेदकतानिवेशेकेवलप्रतिज्ञार्थबोधवत्प्रतिज्ञाहेतुभयार्थ

बोधस्यापि तद्घटितानतिरिक्तविषयत्वाभावेन दर्शितातिव्याप्तेरसत्वाच्च ॥ ननु तादृशविषयत्वावच्छिन्नप्रतिबंधकतानिरूपितव
ध्यताशून्यसंशयप्रतिबंधकतावच्छेदकविषयिताशून्यत्वमेव कुतो न कृतं ॥ अवच्छिन्नत्वं स्वरूपसंबंधविशेषः ॥ तथा सत्यनाहा
र्य्यप्रामाण्यज्ञानानास्कंदितनिश्चयत्वानिवेशेन च लाघवात् ॥ धूमादालोकवानित्यादिप्रतिज्ञायाश्च संग्रहार्थं विषयितायां स्वाश्रयत्व
स्वानाश्रयविषयित्वानिरूपकत्वोभयसंबंधेन प्रतिबंधकतावच्छेदकत्ववत्वस्यैव निवेश्यत्वादित्यन्यूनविषयकत्वं व्यर्थमिति चेन्न ॥
तथा सति निगमनेऽतिव्याप्तेः ॥ वन्हिर्ज्ञानज्ञाप्यो न वेति संशयस्य तादृशप्रतिबंध्यत्वेपि उक्तसंबंधेन तत्प्रतिबंधकतावच्छेदकत्वव
त्वाविषयताया अभावात् ॥ धूमज्ञानज्ञाप्यवन्हिमान्न वेति संशयप्रतिबंधकतायाश्च तादृशविषयतावच्छिन्नत्वात् ॥ यदि च प्रति
बंधकतायां तादृशविषयित्वानतःपानिविषयित्वावच्छिन्नत्वं विशेषणमुच्यते तदासिद्धमन्नमिति न्यायायानाग्रंथकारो व्यापकत्व
रूपमवच्छिन्नत्वमन्यूनविषयकत्वावच्छिन्नजन्यतांच व्याप्यांच कारैवेति न किंचिदेतत् ॥ तन्निवर्त्तकतानवच्छेदकविषयित्वोक्तौ न निगमन
वारणमिति तदवच्छेदकविषयिताशून्यत्वमुक्तं ॥ व्यापकत्वेति तादृशनिश्चयत्वव्यापकप्रतिबंधकत्वशून्येत्यर्थः ॥ समुदायस्येति ॥
केवलपक्षविषयकत्वस्य ॥ द्रव्यत्वपृथिवीत्वमेयत्वादिना पक्षविषयकज्ञानसाधारणतया तादृशपक्षविषयकनिश्चयत्वव्यापक

प्रतिबंधकताप्रसिद्धिरित्यर्थः॥इत्थंच ग्रंथदूषणस्याभिधानीयत्वेन॥स्वपदं यादृशज्ञानबोधमादाय लक्षणं संगमनीयं तादृशज्ञा
६७ नबोधपरं निगमनजन्यबोधवृत्तित्वविशिष्टतादृशप्रकारतामादाय दूषयति तादृशेति॥निगमनादिति॥निगमनजन्यबोधीयसाध्यादिवि
षयताया अन्यत्राभावात् व्याप्त्यविषयकत्वकल्पे हेत्वंते ऽतिव्याप्तिशंकां परिहर्तुं तं कल्पमवतारयति॥सत्यं तस्येति निगमनेचेति॥
तथाच न्यूनविषयकत्वनिर्वाहः यद्रूपेति॥नच यद्रूपावच्छिन्नप्रकारतानिरूपितप्रकृतहेतुप्रकारतानिरूपितप्रकृतविशेष्यत्वं॥तादृशजन
कतायाः स्वरूपसंबंधरूपावच्छेदकत्ववदित्येवोचितं निश्चयत्वाद्यनिवेशेन लाघवादिति वाच्यम्॥वन्हिसमानाधिकरणकरणधूमका
लीनपर्वतो वन्हिमान् धूमादित्यादौ तथाविधा साध्यसामानाधिकरण्यत्वावच्छिन्नहेतुप्रकारतानिरूपितपक्षविशेष्यतामादायातिव्याप्तेः
॥अभावद्वयं॥अन्वयव्याप्त्यविषयकत्वव्यतिरेकव्याप्त्यविषयकत्वोभयं॥केचित्तु प्रकृतपक्षविशेष्यतानिरूपितसाध्यतावच्छेदका
वच्छिन्नधर्मितानिरूपितयत्किंचित्प्रकारताऽन्यत्वमनतिरिक्तविषयकत्वं॥नच पर्वतो धूमात् धूमप्रागभाववान् वन्हिमान् धूमादित्यादा
वव्याप्तिस्तज्जन्यबोधस्य तादृशज्ञाप्यत्वप्रकारताकत्वादिति वाच्यं॥साध्यतावच्छेदकपर्याप्तधर्मितावच्छेदकतानिवेशात्॥एवंच तादृ
शधर्मितात्वेन तन्निरूपितप्रकारतानिवेशान्नाव्याप्तिः॥यद्धर्मिनिगमनेज्ञाप्यत्वप्रकारतानिरूपकत्वं साध्यधर्मितात्वेनैव न तु पक्षविशेष्यता

निरूपितसाध्यधर्मितात्वेन॥ किंच पक्षविशेष्यतानिरूपितसाध्यधर्मितात्वमप्रसिद्धं तथापि पक्षविशेष्यतानिरूपितनिष्ठसाध्यधर्मितात्वनिवे
शान्न दोषः॥ निगमनेन्वैकत्र द्वयमिति रीत्यान वन्हीत्वव्याप्यत्वयोर्भानसंभव इति वदंति॥ हेतुत्वजन्यत्वघटितनिरुक्तोतेनोदाहरणादिस्य दासइति
मूलानुरोधादगत्या व्यापकत्वमेवानुगमनीयं॥ अत्र तु व्याप्त्यनुगमेपि तन्मूलसंगतिस्फुटयति यद्यपीत्यादिना नातिप्रसंग इत्यंतेन। तथाचै
तत्पे यो यो धूमवान् स स वन्हिमान् यथा पर्वत इत्युदाहरणं न स्वीकार्यं अन्यथा तस्य निरुक्तान्यूनन्यूनविषयकत्वेन व्याप्तिबोधने तात्पर्याभावाद
ति व्याप्तेर्दुर्वारत्वापातादिति॥ अत एवानपदं सिषाधयिषाधीनन्यायप्रयोगानुपगमे वक्ष्यति॥ सिषाधयिषेति तदुपगमे तु अनापत्त्या उदा
हरणघटकत्वं अनुगतव्यापकत्वाविषयकत्वे सत्यन्यूनविषयकत्वं वा निवेश्यमिति भावः॥ न्या[illegible]यांतर्गतत्वोपेक्ष॥ बीजमाह॥ हेत्वंतेति॥
तस्य स्फुटं पर्वतवृत्तित्वलाभेन प्रकृतपक्षवृत्तित्वलाभ इत्यतो विशिष्टेति॥ तद्वृत्तिर्विशिष्टालोके वृत्तिर्न तु शुद्धालोकवृत्तिः॥ शाब्दबोधे तु व्यवहिति
वेद्यत्वाप्रसरेपि मानसस्तद्बोध इत्यावेदनार्थार्थत इत्युक्तं॥ अर्थत इति॥ प्रकृतसाध्यव्याप्तिविशिष्टप्रकृतपक्षवृत्तित्वं च ताद्दशागमकत्वा
भावव्यावर्तकतया तथाविधगमकतामानसेप्युपयुज्यते॥ इदमुपलक्षणं ताद्दशस्थले संदेहाभावान्न्यायासंभवोपि द्रष्टव्यः॥ सधर्मेति॥
एतेन व्याप्तिविशिष्टस्यालोकादेर्विशिष्टपक्षावृत्तित्वशंकानुच्छेदाधेत्वाकांक्षेति सूचितं॥ तस्या आकांक्षायाः उत्तरीत्योपनयाकांक्षासत्वा

दाह॥ उदाहरणमात्रेऽतिव्याप्तिभानस्यैवतत्प्रयोज्यत्वात्॥ एतेन एकदानव्याप्तिद्वयाभिधानमिति दीधितिकारोक्तेन श्चान्वयेति॥
अन्वयव्यतिरेकोदाहरणकांक्षाजनकज्ञानजनकवयवत्वरूपं॥ तल्लक्षणं॥ हेतुलक्षणं॥ पक्षसपक्षसत्तोविपक्षासत्तोहेतोर्व
चनमित्येवंरूपं॥ अन्यथेत्यादिना दोषकथनेनातएवेत्यादिना दोषांतरकथनमसंगतमित्याशंकां वारयति॥ अतएवेति॥ नन्विति॥ अयं
गौरितिप्रतिज्ञायां गोसाध्यकत्वं यदुक्तं तदेव दीधितिकारः स्वयमेव द्रढयतीति नन्वित्यवतारणतात्पर्यं यादृशप्रतिज्ञावाक्याद्गोत्वोप
स्थितिस्तत्र गोत्वस्य साध्यध्यत्वस्यं भवाद्गोत्वादेरित्यसंगतमित्याशंकां निरस्यति तत्रेति ननु प्रतिज्ञायाः साध्यतावच्छेदकरूपेण साध्य
भिन्नदंडबोधकत्वात्॥ अन्यथा नामार्थयोरितिव्युत्पत्तिभंगापत्तेः॥ तादृशदंडत्वं तु साध्यतावच्छेदकइत्याशयेन शंकते यद्यपीति॥
प्रतिज्ञाया इति। एकाभेदावगाहिशाब्दबोधजनकत्वेपीति शेषः॥ अनुमाने विलंबान्मानसानुधावनं॥ इदृशस्थले तात्पर्यविषयीभूत
साध्यतावच्छेदकोपस्थितिमादाय तत्प्रयोजकस्यापि जिज्ञासानिवर्तकत्वमुपेयं॥ अनन्यगतिकत्वात् पदार्थांतरं ज्ञानज्ञाप्यत्वं॥ इतरप
दार्थप्रकारकवाद् बोधं प्रतिस्वातंत्र्येणोपस्थितेः कारणत्वेपि संबंधिकस्थलवद् नुभवानुरोधेनैतादृशस्थलेपि कथं चिदुपस्थितेरुप
योग इत्यु■काव प्याह॥ इदमिति॥ नशपदार्थांतरान्वयित्वासंभवप्रयोजकं अन्यथा बाधाप्रतिबध्यत्वापत्तिः॥ तथाच गोत्वस्य जातिरूपत्वेन

स्वरूपतोभाने स्वरूपतोभासमानपदार्थे पदार्थान्तरस्य ज्ञानज्ञाप्यत्वस्यान्वयेन संभवतीत्यर्थः॥ इदं तु बोध्यं पदार्थतावच्छेदकजातौ इति जातिपदमुपाद
दत्तादीधितिकृतैव स्वरूपतोभासमानतया ईतरपदार्थान्वयो दुर्वच इत्युक्तमिति भट्टाचार्याणां पुनस्तत्कथनमनुचितमिति॥ नहि जातेः किंचिद्रूपेण
मानमप्रसिद्धं येन जातावित्युक्तिमात्रेण स्वरूपतोभासमानत्वं लभ्येतेति भट्टाचार्याणां न तत्कथनासंगतिः॥ एकवाक्यताज्ञानहीनं प्रत्येव व्याख्यातादे
रुपयोगादित्यन्ये॥ वह्निमान् इति॥ प्रतिज्ञोपनययोरेकरूपावच्छिन्नसाध्यबोधकत्वानियमात्॥ तदद्यमित्यस्वरसस्सूचनाय॥ सवत्तद्स्यास्त्यस्मि
न्निति मतुप् इति सूत्रे ऽस्यास्मिन्नित्यनेन नार्थो विकल्प्यते येन रक्तत्वप्रसंगात्॥ नन्वसंबंधवान् संबंधावच्छिन्नाधिकरणत्ववाश्चे पृथग्थोनाह
शाधिकरणतायाः संबंधरूपत्वात्॥ तस्मान्मतुपो भेदसंबंधो नान्वयप्रयोजकाकांक्षाघटकतामात्रस्यापि लाभायास्मिन्निति तत्रोक्तं॥ तदर्थश्च
समभिव्याहृतपदोपस्थाप्याधिकरणे भेदसंबंधेनान्वयार्थबोधकान्यतुप्स्यादिति॥ चैत्रो धनीत्यादावस्येत्यर्थे मतुप् नास्तित्यर्थे इति प्रवा
दश्च संबंधसंसर्गकभानानुपगमपरः॥ अन्यथा चैत्रो न धनीत्यादौ वृत्त्यनियामकसंबंधावच्छिन्नानावप्रत्ययापत्तेः॥ प्रतियोग्यन्वयत्वात्॥
यत्तु संबंधपारतंत्र्येण तत्संबंधेन वह्निभानमभिप्रेत्यैव मणिकृतानिरुक्तान्यूनातिरिक्तविषयकत्वनिवेशो नेदृशपूर्वपक्षानवतार एवेति॥ तन्न॥
पर्वतो वह्निसंबंधी नवेति संशयस्य पक्षे साध्यतावच्छेदकसंबंधेन साध्यवत्तानिर्णयानिवर्त्यस्य निवर्त्तकत्वादव्याप्तेः॥ यत्र विषयविशेषे निय

६९ मतः संयोगसंबंधावच्छिन्नतदंकुराभावरूपबाधग्रहोत्तरएवपक्षेतदंकुरसंबंध्यभेदबोधस्तत्रप्रतिज्ञायामन्यूनविषयकु
बोधजनकत्वासत्वेनाव्याप्तेश्च एतेनव्याप्यविषयकत्वरूपानतिरिक्तविषयकत्वनिवेशोपिनशंक्यः॥ एवंपाकजेतियानित्यादौ
भावकत्वांनिरर्थकत्वमस्त्यम्॥ नेदस्यविशेषणताविशेषेणपक्षांशेविशेषणत्वादित्यवयः॥ एवंनस्येत्यादावपि॥ शाब्दबोधस्य
भेदाश्रयत्वप्रकारकतयानुमित्यपेक्षयाएकंवैलक्षण्यंपरंत्वपंचम्यर्थाभेतरतरप्रतियोगिकत्वप्रकारकतयेत्यादिकमूह्यम्॥
एवमन्याभेदवतोइतरेभ्योभेदवतोइतरभेदवतीत्यादिप्रतिज्ञार्थबोधः॥ अनुषंगपक्षेनेतराणीतिप्रतिज्ञार्थबोधश्चद्रष्टव्यः॥ या
दृशपक्षोपादानप्रयोजनंस्फूरयति॥ इदमिति॥ प्रतिज्ञान्यबोधजनकत्वस्यप्रतिज्ञात्वेआत्माश्रयादाह॥ अत्रचेति॥ बोधेति॥ प्रतिज
न्यत्वेनतादृशबोधपरिचयस्तज्जनकत्वंप्रतिज्ञात्वं॥ तथाचदीधितिस्थंयादृशपक्षकेत्यारभ्यसंप्रदायसिद्धइत्यंतंपरिचायकमिति
भावः॥ एवंचेति॥ भिद्यतेभिन्नमित्यादौप्रतिज्ञार्थबोधानांविशिष्योपादानेन्वेत्यर्थः॥ अन्यतमत्वेनानुगमः॥ सफलोभवतीतिशेषः॥
अन्यथाप्रतिज्ञार्थत्वेनानुगमय्यतादृशार्थविषयकशाब्दबोधानिवर्त्यसंशयानिवर्तकप्रतिज्ञार्थबोधजनकत्वमित्यस्यैवसम्यक्त्वेअ
न्यतमत्वनिवेशोव्यर्थएवस्यादितिभावः॥ एकेति॥ विभिन्नसाध्यादिस्थलीयप्रतिज्ञासाधारणमनुगतंलक्षणंतुनास्त्येवइदानीमेकधर्मा

वच्छिन्नसाध्यकनिखिलप्रतिज्ञासाधारणलक्षणमप्यनुगतं निर्वक्तुमशक्यमेवस्यादतो ऽन्यतमत्वनिवेशो न मित्यर्थः॥ कूटघटितधर्मस्येति॥
तादृशकूटवत्संशयप्रतिबंधकत्वसामान्याभावविशिष्टबोधनिष्ठस्य तादृशबोधनिष्ठवक्ष्यमाणजन्यतानिष्ठस्य वान्यतमत्वस्येत्यर्थः॥ तादृशे
ति॥ नचोक्तरीत्या तादृशान्यतमबोधनिष्ठनिवर्त्तकताकत्वसामान्याभाववत्संशयस्याप्रसिद्धेः॥ एवं तादृशान्यतमत्वव्यापकप्रतिबंधकता
निवेशोपि न संभवतीति वाच्यम्॥ तादृशतादृशविशिष्टार्थनिश्चयत्वव्यापकताश्रयप्रतिबंधकत्वसामान्याभावस्य पर्यवसितव्यापकताभेदकू न्यतमव्यापकता
टवच्छिन्नत्वघटितस्य किंवा तादृशानिश्चयत्वव्यापकप्रतिबंधकतान्यतमनिवर्त्तकताकत्वसामान्याभावस्य प्रतिबंधकताभेदकूटवच्छिन्नत्वघटि
तस्याभिप्रेतत्वात्॥ नन्वेवमपि तादृशतादृशबोधभेदकूटवच्छिन्नत्वरूपेति ग्रंथासंगतिरिति वाच्यम्॥ अन्यतमत्वस्य स्वप्रतियोगितावच्छेदकभेद
प्रतियोगितावच्छेदकरूपत्वात्॥ निवर्त्यत्वसामान्याभावस्य निवर्त्यत्वनिष्ठान्यतमत्वावच्छिन्नाभावरूपत्वात् इत्यसंगत्यभावात्॥ वस्तुतस्तु तादृ
शबोधः प्रतिज्ञार्थमात्रबोधस्तद्व्यक्तित्वेनैवान्यतमत्वघटक इति अन्यतमनिरूपितनिवर्त्यत्वसामान्याभाव इति यथाश्रुतमेव सम्यक्॥ न च स्वनि
वर्त्तकतान्यूनवृत्तितादृशतादृशनिश्चयान्यतमत्वकत्वनिवर्त्यत्वसामान्याभावो नार्थः संशयविशेषणं॥ एवं च तत्तद्व्यक्तित्वेन संशयानामुपादाना
त्तत्तदनिवर्त्तकत्वकूटनिवेशान्नानुगम इति वाच्यम्॥ तथापि संबंधी वह्निमान्न वेति संशयस्य स्वपदेनोपादानसंभवादव्याप्तेः॥ तादृशेति॥ तादृश

तादृशनिश्चयत्वव्यापकप्रतिबंधकतानिरूपितप्रतिबध्यत्वाभाववत्कूटस्यैवेत्यर्थः॥ अन्यतमेनापीति॥ अन्यतममध्ये केनापीत्यर्थः॥ तादृशकूट
७० त्वलाभः॥ एतेन तादृशबोधनिवर्त्यत्वे सति तादृशशाब्दबोधनिवर्त्यत्वं यद्यन्यतमनिवर्त्यत्वं तदा सकलसंशयसंग्रहेण संभवः इत्यपास्तम्॥
एतेनेति॥ व्युत्पत्तिबलादेव सामान्याभावबलादपि कारवैय्यर्थ्यं चेत्यपि बोध्यम्॥ अन्यतमत्वघटितलक्षणं तु भेदादिसाध्यकस्थल एवादरणीयं
न तु वन्ह्यादिसाध्यकस्थलेपि तत्र तादृशशाब्दबोधानिवर्त्यत्वं शाया निवर्तकबोधजनकत्वस्यैव सम्यक्त्वात्॥ अन्यथा तादृशकेयधान्यतम
त्वाप्रसिद्धाऽव्याप्तिरित्यात्॥ विशेष्यदलेइति॥ अन्यतमबोधदले इत्यर्थः॥ धूमादालोकवानित्यादौ प्रतिज्ञार्थविषयकनिश्चयत्वव्यापक
प्रतिबंधकताकत्वाभावएव निवेश्यं न तु तत्कूटं पर्वतो वन्हिमान्धूमादित्यादौ न्यूनविषयकत्वमपि हेयमिति बोध्यम्॥ अत्र यादृशपदसा
ध्यकाइत्यादि परिस्वापक घटकस्य प्रकृतपक्षसाध्यकार्थकत्वे एव तत्र यादृशरूपावच्छिन्नपक्षे यादृशरूपावच्छिन्नप्रकारकबोधत्वा
भाम्॥ निवर्तकतान्वयिनां जनकतान्वयिनां च बोधानां तादृशरूपावच्छिन्नसाध्यपक्षविषयकत्वलाभ इति प्रथममतः परिवापकप्रविष्टयोः
प्रकृतसाध्ययोः प्रत्येकं प्रयोजनमाह वन्हित्वेति॥ पक्षतावच्छेदकावच्छिन्नत्वानिवेशे घटवद्भूतलसमानकालीनः पर्वतो वन्हिमानिति सा
ध्यतावच्छेदकावच्छिन्नत्वानिवेशे पर्वतो घटवद्भूतलकालीनवन्हिमानिति च बोधे इत्यर्थः॥ संशयोपीतीति संशयाप्रसिद्धौ हेतुः॥ ननु

प्रकृतपक्षसाध्ययोरेकतरस्यनिवेशेतादृशाशाकृत्वावच्छिन्ननिवर्त्तकतानिवेशे अवच्छिन्नत्वंव्यापकत्वमेव वाच्यंएवंचतादृशबोधव्यापक
निवर्त्तकतायाअप्रसिध्धेरेवाभिधानीयाननुसंज्ञायाप्रसिद्धिरितिन्वेन्नानिवर्त्तकतायांस्वरूपसंबंधरूपावच्छिन्नत्वनिविष्टमित्यभिप्राया
त्। प्रागुपदर्शितएवातिप्रसंगइतियोजनावन्हिसाध्यकोपनयस्य वन्हिव्याप्यधूमसाध्यकप्रतिज्ञार्थबोधजनकत्वाद्वन्हिंसाध्यकन्यायां
तर्गतत्वाच्चप्रतिज्ञात्वापत्तिरूपोऽतिप्रसंगः इत्यर्थः॥ ननुतादृशान्यतमबोधजनकत्वमेवास्तुइत्यतआह॥ अधिकंत्विति अक्षततपेति।
पर्याप्त्यनिवेशादितिभावः॥ निगमनादीत्यादिनानतिरिक्तविषयकत्वघटकसाध्यतावच्छेदकसंबंधनिवेशाव्याप्तिस्थलस्यहेतुत्वंप्र
मेयंप्रमेयादित्यादौहेत्ववयवस्यपरिग्रहः॥ संज्ञायाप्रसिद्धिरिति॥ नन्वेवंनिगमनातिव्याप्तिशंकायाः अनवकाशइतिवाच्यम्। दत्तो
त्तरत्वात्॥ यत्तु। पर्वतत्वाद्यवच्छिन्नविशेष्यतानिरूपितप्रकारतानिरूपितवन्हित्वावच्छिन्ननिवर्त्ततायाउपादानेनिगमनजन्यबोधी
यतादृशवन्हित्वावच्छिन्नप्रकारतायाअपिवन्हित्वावच्छिन्नविशेष्यतात्वेनस्वरूपसंबंधरूपनिवर्त्तकतावच्छेदकत्वमितितन्न॥ निग
मनार्थघटकव्याप्त्यादिघटकैकपदार्थेतथाविधापरपदार्थाभावसंशयस्यवन्हिसंबधीवन्हिमान्नवेतिसंशयस्यचतादृशानि
श्चयत्वावच्छिन्नानिवर्त्यत्वात्विशेष्यदलं॥ तादृशशाब्दबोधान्यतमदलांवन्हित्वादिति॥ पूर्वमेकतरधर्मावच्छिन्नविषयताक[illegible]

त्वनिवेशेदोषउक्तः॥ अयंचधर्मद्वयस्यप्रत्येकावच्छिन्नविषयतयोर्निवेशइतिभेदः॥ यद्वापूर्वमेकतरधर्मावच्छिन्नविषयताकत्वावच्छिन्न
७१ निवर्त्तकतायाइदानींचतादृशविषयताकत्वव्यापकनिवर्त्तकतायानिवेशइतिभेदः॥ नन्वभेदसंबंधेनसाध्यव[illegible]द्विशिष्टपक्षविषयकत्वरू
पविशिष्टविषयकत्वमेवानतिरिक्तविषयकत्वघटकबोधविशेषणमिति॥ भ्रमसाधारणनिरूप्यनिरूपकभावापन्नविषयिताशालित्वेनबो
धानांनिवेशस्यपक्षेयादृशविशिष्टवत्त्वबोधिकाइतिग्रंथनदीधितिकृतांप्रदर्शनवैयर्थ्यमित्याशंकते॥ यद्यपीति॥ यादृशविशिष्टार्थबो
धजनिकाइत्युक्त्वावास्तवविशिष्टविषयिताशालिबोधप्रदर्शनेजनकतात्वयिबोधेपिवास्तवविशिष्टविषयिताशालित्वलाभादसंभवंवक्तुं
भ्रमिकामास्ययति॥ तथापीत्यादिनाहेत्वर्थमात्रविषयकबोधोपादानेनतस्यवास्तवप्रतिज्ञार्थाविषयकत्वेनान्यतमांतर्गतत्वाभावइति
समूहालंबनानुसरणंन्यायावयवत्वमुभयघटकेत्यादिविशेषणाघटितमित्याशयेनहेत्वंतेतन्निवेशमनभिप्रेत्यन्वहेताविन्युक्तम्॥ एक
देशेप्यतिव्याप्तिमाह॥ प्रतिज्ञाजन्येति॥ एकदेशेन्वेति॥ प्रतिज्ञाघटकेधूमादितिभागेआलोकवानितिभागेवन्हिमानितिभागेन्वेत्यर्थः॥ अत
थात्वादिति॥ येनरूपेणविषयितायाअवच्छेदकत्वंतस्यास्तेनैवरूपेणस्वरूपसंबंधरूपावच्छेदकतयानिवेशः॥ अन्यथाविशिष्टवि
षयितानिवेशोकथंतास्यात्॥ तन्निवेशेप्यग्निमायायोग्यतायानिर्वन्हिपर्वतपदपर्वतोवन्हिमानितिवाक्यवारणायावश्यकत्वादिति

बोध्यं॥ वैयर्थ्यमितिपर्याप्त्युपादानेन निगमनजन्यबोधस्याधिकावगाहित्वात्तद्वैयर्थ्यं स्यादिति भावः॥ ननु पर्याप्तिनिवेशे धूमादालोकवा
न्पर्वतो वह्निमान् धूमादित्यादौ प्रतिज्ञाहेतुसमुदायेऽतिव्याप्तिर्दुर्वारैव तादृशवाक्यद्वयजन्यविशिष्टवैशिष्ट्यावगाहिबोधनिष्ठहेतुत्वर्थ
विशिष्टप्रतिज्ञार्थविषयकत्वावच्छिन्नजन्यतायाः प्रतिज्ञार्थविषयकत्वावच्छिन्नतया तन्निरूपितजनकताशालित्वात्॥ नन्वेतादृशविशिष्टवैशि
ष्ट्यबोधोऽनतिरिक्तविषयकः वह्निधूमज्ञानज्ञाप्यो न वेति संशयस्यैव प्रतिज्ञाद्यर्थबोधानिवर्त्यतया निवर्तकत्वादिति वाच्यम्॥ एवमपि धू
माद्वह्निमतः सधर्मा पर्वतो वह्निमान् धूमादित्यादौ हेत्वन्तेऽतिव्याप्तेः विशिष्टवैशिष्ट्यावगाहिबोधनिवर्त्यत्वस्य वह्निधूमज्ञानज्ञाप्यो न वेति
संशये सत्त्वेन तदनिवर्त्यत्वं शयानिवर्तकत्वस्याक्षतत्वादिति चेन्न॥ एकमपि तादृशप्रतिज्ञार्थविषयकनिश्चयत्वव्यापकनिवर्तकतान्यस्य व
पर्वतो धूमेज्ञानज्ञाप्यवह्निमान्न वेति संशयस्य निवर्तकतयैवादोषादिति न पर्याप्तिनिवेश आवश्यक इति॥ ननु धूमाद्वह्निमत्सर्वतः सधर्मा पर्वतो
वह्निमान् धूमादित्यादौ हेत्वन्तेऽतिव्याप्तिः तत्र विशिष्टवैशिष्ट्यावगाहिबोधनिवर्त्यतायाऽउक्तसंशयेऽक्षतत्वादिति चेन्न॥ उपनयानुत्थानेन
तादृशप्रतिज्ञाया एवाभत्वात्॥ ननु पर्वतो वह्निमान् धूमादित्यादौ हेत्वर्थविशिष्टप्रतिज्ञार्थविषयकबोधजनके हेत्वन्तेऽतिव्याप्तिरेव नास्ति
साध्यतावच्छेदके प्रकारतावच्छेदकतापर्याप्तिनिवेशादिति चेन्न॥ अनतिरिक्तविषयकत्वदलेनैव वारणात्तत्पर्याप्तिरपि न निवेश्यत इत्यपि

प्रायात्॥ अव्याप्तेरपीति सिषाधयिषाविरहकालिनबोधजनकेइत्यादिः सिध्येः प्रतिज्ञाजन्यबोधस्य अप्रतिबंधकत्वेपि॥ अनुमित्य
७२ प्रतिबंधकत्वेपि॥ पुनः संशयत्वनिवेशवैयर्थ्यशंकते॥ नयेति॥ तस्याः अनुमितेः॥ तस्यापिप्रत्यक्षस्यापि॥ प्रतिज्ञार्थनिश्चयसत्वेपि तद्भेदव्या
प्यवनिश्चयादिनाजनितेतद्भेदप्रत्येतादृशाप्रतिबंधकताकान्यत्वबोध्यं॥ ननुप्रतिबंधकत्वाभावस्यैवनिवेशः सम्यक्॥ प्रतिबंधकतावच्छेदक
विषयतापर्यंतनिवेशाऽसंभवात्॥ वन्हिमत्वावच्छेदेन घटाभावावगाहिग्रहेण वन्हिमत्वादौ घटव्याप्त्यवगाहिग्रहेणावासहितस्य प्रतिज्ञार्थ
बोधस्य पर्वतोघटवान्नवेति संशयनिवर्त्तकत्वात्॥ व्याप्यत्वस्यकेवलान्वयितया ग्राह्याभावावगाहित्वेनानुगमेन च तत्तदभावावगाहेत्वेन प्रति
बंधकत्वनिवेशोसंभवात् प्रतिबंधकत्वाभावनिवेशत्ववच्छेदकधर्मदर्शनशून्यकालीनप्रतिज्ञाजन्यबोधमादाय लक्षणसमन्वयसंभवा
दितिमेवम्॥ ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतायाएवोपादानात्॥ परंतु तादृशसंशयप्रतिबंधकत्वाभावविशिष्टप्रामाण्यग्रहाभावनि
वेशात्तादृशनिगमनव्युदासः॥ नन्वेवं प्रत्यक्षसामान्योपादानेपि तादृशबोधानिवर्त्यविशेषदर्शनकालीनविपरीतनिश्चयस्याप्रतिबंधकं यद्वि
शेषदर्शनकालीनज्ञानं तत्स्वरूपयोग्यसत्वेन लक्षणसमन्वयसंभवात्संशयपर्यंतनुधावनवैयर्थ्यमिति वाच्यम्॥ विशेषदर्शनकालीनस्वा
र्थबोधजनकत्वमादाय निगमनातिव्याप्तिरतस्तादृशाप्रतिबंधकत्वाभावविशिष्टाप्रमाण्यग्रहाभावविशिष्टविशेषदर्शनाभावविशिष्टबोधज

नक[illegible]त्वस्यवान्यतयासंशयपदसार्थक्यादितिप्रतिबंधकत्वाभावनिवेशपक्षंरोचयति॥ अत्रसंशयांशेविशिष्टभेदकूटकूटनिवेशमपेक्ष्यप्रति
बंधकतायांतादृशनिश्चयत्वावच्छिन्नत्वनिवेशेलाघवमादर्शयतिअत्रेत्यादिना॥ अनवच्छिन्नत्वमव्यापकत्वंतादृशनिश्चयनिष्ठभेदप्रतियोगि
तावच्छेदकत्वकूटं॥ कूटोपादानप्रयोजनंस्फुटमेव॥ स्वरूपसंबंधावच्छिन्नत्वाभावनिवेशेविशेष्यदलवैयर्थ्यापत्तेः॥ संबंधीवन्हिमानवेत्यादिसं
शयप्रतिबंधकतामादायाव्याप्तेश्चज्ञानंबोधः॥ हेत्वंतादिति॥ निगमनघटकहेतुभागइतितुनार्थः॥ तत्रान्यूनविषयकत्वाभावात्॥ केचित्तुअप्रामा
ण्यग्रहाभावविशिष्टतादृशतादृशशाब्दत्वव्यापकप्रतिबंधकताकान्यसंशयाप्रतिबंधकत्वंनिरुक्तशाब्दत्वाव्यापकसंशयप्रतिबंधकत्वाभावोवायुक्तः
॥ अनाहार्यत्वनिश्चयत्वयोरनिवेशेनलाघवादितिपरिष्कुर्वंतितेषामनुपश्यामिमितिर्ज्ञानंमितिव्युत्पत्तिविरोधः॥ मितिपदस्यशाब्दत्वेनावाचकत्वात्[illegible]
शाब्दबोधादेरपिनव्यमतेसंशयादिरूपतयायथास्थितस्यैवज्ञायरत्वाच्चाउ[illegible]॥ धूमालोकवानित्यादिस्थलीयेत्यर्थः॥ ननुबोधान्यमत्वनिवेशेहे
त्वर्थबोधकभागघटिकाप्रतिज्ञास्थलीयहेतावतिव्याप्तिरतस्तत्परित्यज्यजन्यतान्यतमत्वंनिवेशयति॥ प्रकृतेति॥ पक्षेसाध्यवैशिष्ट्यावगाहित्वेनान्यून
विषयकत्वंकिंतुतादृशतादृशबुद्धित्वमितिभावः॥ उक्तेतिधूमालोकवान्पर्वतोवन्हिमान्हेतुत्वंचधूमीयमित्युक्तेत्यर्थः॥ जन्यतायांतादृशविषयता
वच्छिन्नत्वंनिवेश्यमितिपूर्वाभिधानेनैवजन्यतास्वन्यतमत्वमितिप्रायपदंनत्वन्यथिधइतिस्फुटीकंणोद्वास्थलेऽन्यतमत्वंनक्षक्षणघटकमिति

दीधितिकृतैव व्यंजितं॥ तदात्वेति कालीकादिसंबंध संग्रहाय॥ पक्ष्यतीति पचतीत्यादौ कालो न भासते अतीतत्वाद्यविवक्षायामिव वर्तमाने लडित्यनुशासन
७३ प्रवृत्तेः॥ अत एवापाक्षीत् पक्ष्यतीति तत्र न प्रतिज्ञा॥ एवं त्वं पचसीत्यादिकाः साभविष्यतिन तु पचसीति॥ युष्मदर्थकृत्योमी ध्यमायुप स्थापितयोः कथं
त्विदि कृत्रापर बोधेपि विविक्तपक्षानुपस्थानात्॥ एवमेकविभक्त्यंतपदरूपापि विभक्त्यंतं पक्षीकृत्य क्रियानामार्थसाध्ये कापचतिराजा इत्यादिकान
सेति बोध्यं॥ इतरेति॥ इतरेभ्योन्याइतरेभ्यो भिन्नाः इतरभेदवतीतरेभ्यो भेदवती नेतराणीति। चद्रष्टव्यम्॥ भिद्यत इति॥ भिद्धातोरकर्मकत्वात् तदुत्तर
भावाख्यातोऽनर्थक इति तु न शंक्यं॥ भज्यते ऽभेदि वा घट इति प्रयोगवशात्तस्य सकर्मकत्वात्॥ एवं भेदप्रयोजको व्यापार एव धात्वर्थः॥ भेदस्त्ववयव
विभागः॥ अत एव भिद्यते कुशूलः स्वयमेवेति कर्मकर्तृप्रयोग इत्यपि न शंक्यं॥ ऽव्यावृत्तव्यावर्तकयोर्भेद्यभेदकव्यवहारदर्शनेन अन्योन्याभावप्रयो
जक व्यापारेपि तन्व्यक्तिसिद्धेः॥ अत एव भिद्यते हृदयग्रंथिरिति वचने चिज्जडतादात्म्याभिमाननिवर्तकं ज्ञायमानभेदमपि व्यापारविशेष प्रयोज्यं धात्व
र्थमेनिरे सांख्याः॥ व्यापारप्रयोज्यत्वांशं शास्तु प्रतिशाजन्य बोधेन भासते॥ तात्पर्यागोचरत्वात्॥ ननु फलमात्रतात्पर्येण गम्यते ग्राम इति प्रयोग प्रसंगः॥
भिद्यत इत्यादौ व्याप्यादि विशिष्टहेतुमत्त्वरूप व्यापारस्य विषयितया भेदावच्छिन्नजन्यताप्रयोजकत्वेन तत्प्रयोजकस्यापनयांतनिर्वाह्यतया भानदर्श
नेपि गम्यत इत्यादौ तद्भानं निर्बीजत्वात्॥ व्यापाराविशेष्यफलबोधने कर्मप्रत्ययो दुर्घट इत्यपि न फलव्यापारयोः पृथधात्वर्थतामतो फलविषयकत्व

पारविषयकबोधंजनयत्वितिज्ञाक्तिंनिवेश्यफलवान्वकात्कर्म्मप्रत्ययभ्युपगम्यफलमात्रतात्पर्यघटितसामर्थ्यांधातुकर्मप्रत्यययोरानुपूर्वीज्ञान
स्यप्रवेश्यत्वादितिदिक्॥प्रतांतरमवतारयति॥अनतीति॥पूर्ववदेवेति॥तावद्बोधानिवर्त्त्ययावत्संशयानिवर्त्तकेयावत्पदघटितपाठेसामान्याभा
वनिवेश एवलाघवेनोचितः इतिबोध्यं॥दर्शितहेत्वितिधूमादालोकवानित्यादिनेत्यादिः॥ननुतावद्भिर्बोधैर्निवर्त्याःसंशयायावंतः इत्यर्थेवक्ष्यमा
णदोषादाहततद्विशिष्टार्थोघटवद्भूतलादिसंशयानामपिघटवद्भूतलादिसंशयानामपिघटवद्भूतलादिविषयकप्रतिज्ञार्थबोधनिष्ठनिवर्त्तकता
कत्वेनतत्संशयनिवर्त्तकबोधानांनातिरिक्तविषयकत्वंनिवर्त्तकतायांचान्यतमबोधत्वव्यापकत्वंनिवेशयितुमशक्यमेवअतोयत्किंचित्त्वमुक्तं॥नन्व
यत्किंचिद्बोधत्वव्यापकत्वनिवेशेपिभेदसाध्यकयावत्प्रतिज्ञासुनलक्षणसमन्वयसंभवः॥पृथिवीतरभिन्नेतिप्रतिज्ञाद्जन्यबोधस्यपृ
थिवीतरेभ्योभिद्यतइतिप्रतिज्ञाविप्रतिपाद्यार्थबोधनिवर्त्त्यसंशयानिवर्त्तकत्वादितिवाच्यम्॥यत्किंचित्पदेनान्यतमघटकीभूतयावद्बो
धानामपिप्रत्येकंसंग्रहसंभवेनसकलप्रतिज्ञासंग्रहसंभवात्॥यत्तुनिरुक्तान्यूनानतिरिक्तविषयकस्यसकलप्रतिज्ञार्थावगाहिसमूहा
लंबनबोधस्यतादृशत्वाल्लक्षणसमन्वयइतितत्तुच्छम्॥तथासतितावत्प्रतिज्ञार्थविषयकबोधत्वव्यापकनिवर्त्तकताकयावत्संशय
निवर्त्तकत्वेनेवघटवद्भूतलादिसंशयमादायदोषवारणाद्न्यतमयत्किंचित्त्वयोर्वैयर्थ्यात्॥समूहालंबनबोधाप्रसिद्धिस्थलेलक्षण

समन्वयार्थनियारूतं॥ एवं तत्तद्बोधनिवर्त्यताकूटवयावत्संशयनिवर्त्तकत्वमपिसमूहालंबनसंशयाप्रसिद्धिस्थलग्रस्ततान्नरुतमितिचेन्नय
७४ त्र्युक्तरीत्याकथं लक्षणसंगतिरिति॥ धूमादालोकवानूपर्वतोवह्निमान्धूमादित्यादौहेत्ववयववारणायसंशयेयावत्वनिवेशः नानाविधेति॥ घटव
त्त्वतत्वादिविषयकतानाविधोदासीनसंशयानामित्यर्थइतिकेचिदुदासीनविषयकत्वेप्यव्याप्तिवारणसंभवात्॥ गौरवमेवेति। अत्र धूमादालोक
वान्पर्वतोवह्निमानित्यादौप्रतिज्ञाहेत्वर्थसमूहालंबनबोधस्यनिरुक्तान्यूनानतिरिक्तविषयकतयातज्जनकेहेत्ववयवेऽतिव्याप्तेः तस्यधूमीय
हेतुताबोधतयाहेत्ववयवस्यापितज्जनकत्वात्॥ तत्तद्विशिष्टार्थबुद्धित्वावच्छिन्नत्वस्यजन्यतायानिवेशोऽननुगमात्॥ अतोऽन्यतमत्वेनतादृश
जन्यतानुगमस्यावश्यकत्वेनिरुक्तान्यूनविषयकत्वरूपबोधविशेषणंव्यर्थमितिबोध्यम्॥ अत्रनिष्कर्षानुसारिणः॥ तेनभेदतदाश्रयत्वादिको
टिकनानाविधसंशयानामेवप्रकृतपक्षसाध्यकप्रतिज्ञार्थबोधनिवर्त्यतयातावत्संशयनिवर्त्तकतायाः प्रत्येकंप्रतिज्ञादिजन्यबोधेऽसत्वेपिस
कलवाक्यजन्यसमूहालंबनबोधस्यतावत्संशयनिवर्त्तकत्वात्॥ तत्रचनिरुक्तानतिरिक्तविषयकत्वसत्वात्तज्जनकत्वमादायैवप्रत्येकप्रतिज्ञा
सुलक्षणसमन्वयोबोध्यइतिपादः॥ नन्वेवमपिधूमादालोकवानूपर्वतोवह्निमान्धूमादित्यादौहेत्वंतहेतौवातिव्याप्तिर्दुर्वारैवतस्यापिनिर
क्तान्यूनानतिरिक्तविषयकप्रकृतप्रतिज्ञार्थहेत्वर्थोभयविषयकसमूहालंबनबोधजनकत्वात्॥ नन्वान्यूनानतिरिक्तविषयकबोधस्यप्रकृत

प्रतिज्ञाप्रतिपाद्यार्थविषयकत्वावच्छिन्नजन्यतानवच्छेदकविषयिताशून्यत्वेन विशेषणान्न दोष इति वाच्यम्॥ तथासति भेदसाधकप्रतिज्ञासुत
त्स्थलीयनिखिलप्रतिज्ञार्थविषयकसमूहालंबनबोधमादायैव लक्षणसमन्वयस्य वाच्यतया तादृशसमूहालंबनबोधस्य निखिलजन्यतामादा
यपरस्परानवच्छेदकविषयिताशून्यत्वेनाव्याप्तेरिति चेन्न उक्तभेदादिसाध्यकस्थलए वान्यतमत्वघटितलक्षणं तत्रैव च तादृशविषयिताशून्य
त्वनिवेशो न संभवति॥ धूमादालोकवानित्यादौ तु बोधे तादृशविषयिताशून्यत्वमावश्यकं लक्षणस्यान्यतमत्वाघटितत्वात्॥ गंधादवनी पृथिवी
तरेभ्यो भिद्यते इत्यादौ तु तत्र तु प्रतिज्ञाप्रतिपाद्यार्थविषयकत्वान्यतमावच्छिन्नजन्यतावच्छेदकविषयिताशून्यत्वं निवेश्यम्॥ उभयत्रापि विषयि
ताशून्यत्वं विषयितानवच्छिन्नत्वं जन्यताविशेषणं कार्यं तेन प्रतिज्ञार्थमात्रबोधमादाय धूमादालोकवानित्यादौ हेतौ नातिव्याप्तिः॥ लक्ष्यभेदेन ल
क्षणभेदस्येष्टत्वात्॥ नन्वेवं विशेषणदानेन निरुक्तान्यूनविषयकत्वनिवेशवैयर्थ्यमिति न्वेदन्यूनविषयकत्वदले नास्यैव विवक्षणात्॥ स्वरूपसं
बंधरूपप्रतिज्ञार्थविषयकत्वावच्छिन्नत्वनिवेशान्निगमनेऽतिव्याप्तिरतः निरुक्ता॥ नतिरिक्तविषयकत्वनिवेशः इत्याहुः॥ वस्तुतस्तु निरुक्तान्यूनानति
रिक्तविषयकबोधत्वव्यापकमुख्यविशेष्यत्वावच्छिन्नजन्यतानिरूपितजनकताशालिवाक्यत्वमेव लक्षणमिदं च सर्वानुगतं॥ धूमादालोकवा
न् पर्वतो वह्निमानित्यादिस्थलीयप्रतिज्ञाहेत्वर्थविषयकसमूहालंबनबोधीयहेत्वर्थमुख्यविशेष्यतानुन तादृशबोधत्वव्यापिकाकेवलप्रतिज्ञार्थ

बोधेन दभावात् इति तादृशसमूहालंबननिष्ठहेत्वर्थविषयकत्वावच्छिन्नजन्यतामालक्षणे घटकत्वान्न हेतावतिव्याप्तिः॥ नन्वेवमन्यूनविषयकत्वं व्य
७५ र्थं॥ लक्षणांतरत्वादिति॥ ननु चैत्रः पचतीत्यादेरुपनयस्य दुर्वचत्वेन न्यायाभावात्प्रतिज्ञात्वमेव न संभवतीति दीधितिकृतां तत्र लक्षणोपवर्णनमसंगत
मित्यभिप्रायेणाशंकते॥ नन्विति॥ अर्थांतरेति॥ यद्रूपावच्छिन्नसाध्यबोधिका प्रतिज्ञा तद्रूपावच्छिन्नसाध्यव्याप्यस्यैव पक्षे उपनेयत्वादिति भावः॥ नि
पातार्थेनेति निपातातिरिक्तनामार्थस्य तादृशनामार्थे भेदसंबंधेनान्वयोऽव्युत्पन्न इति नञो निपातत्वेन तद्धीभावेन तरपदार्थान्वये बाधकाभावात्॥
तद्द्वयमित्यस्वरसः॥ स्वानुयोगितायाः संसर्गतावादिना अनुयोगितानैतरीयेति भेदानुयोगित्वाभाववानिति द्विविधबोधं प्रति तत्संसर्गकशाब्दसाम
ग्र्याः प्रतिबंधकत्वं कल्प्यमिति गौरवं तत्प्रकारतावादिनानुभेदानुयोगितासंबंधावच्छिन्नेतराभाववनित्येकविधबोधं प्रत्येवेति लाघवमिति॥ यः पाक
कृतिसामग्रीमान् सः पाककृतिमानित्युदाहरणोपदर्शितपाकविषयकाभिन्नकृतिव्याप्यत्वविशिष्टपक्षधर्मत्वोपदर्शकः पाककृतिव्याप्यवानित्यु
स्था पनयः सुवच इत्याशंकां वारयितुं अस्य तत्रानुदाहरणत्वं स्पष्टयन्नाह॥ प्रतिज्ञो[illegible]पेनेति अस्य साध्येऽन्वयः॥ रक्तदंडादिसाध्यकोपनयादिसंग्र
हस्य प्रकृतसाध्योपेक्षा॥ वितर्केति॥ यदि तथा शाब्दस्य प्रक्रांतं यद्विशेष्यं स एवार्थस्तदोपनयजन्यबुद्धौ हेतुमत एव विशेष्यत्वात्तस्मात् हेतुमानि
त्यर्थः स्यात्। हेतुमतिन्वहेतौ वा हेतुयत्स्तान्न ज्ञाप्यत्वान्वयो न संभवति॥ अननुभवात्॥ यदि प्रक्रांतप्रकारोऽर्थस्तदोपनयजन्यबोधविशेष्यस्य

पक्षसामान्यतोऽन्वयव्याप्तौ प्रवेशेन प्रकारतयोक्त एव दोषः ॥ यदि प्रक्रांतसाध्यं ॥ तदा केवलान्वयिनि प्रक्रांतोपनयजन्यविशेष्यत्वस्य तादृ
श्याप्रसिद्धिरिति निगमननिराकरणेऽप्रक्रांतं पक्षदृष्टांतरूपविशेष्यं तद्भेदस्य बाधात् केवलान्वयिनि तत्तादृश्याप्रसिद्धेर्दोषोपनयनिराकरणासि
द्धेरिति ॥ प्रक्रांतत्वादिति ॥ व्याप्तिविशिष्टहेतुमत्पक्षबोधकः सत्येवोपनयः कुतो नेति तु नञो वाक्यं न तथा प्रक्रमाभावात् ॥ योग्यतया एकतरार्थ
बोधकत्वासंभवादाह ॥ तात्पर्येति ॥ वन्हीति वन्हिमतः सिद्धौ अर्थत एव वन्हिसिद्धेर्वन्ह्यभावसंशयनिवृत्त्यादिसंभवात् ॥ नन्वयद्रूपावच्छिन्नप्रका
रप्रदर्शिका प्रतिज्ञा तद्रूपावच्छिन्नप्रकारघटितार्थतात्पर्यक एवोपन इति नियमात् प्रतिज्ञाया वन्हिसाध्यकत्वानिराकरणेपि उपनिराकरणेपि उपनयस्य
तथाकारत्वं निराकृतमेवेति वाच्यं ॥ मनुपो निरर्थकत्ववादिनं प्रति उक्तनियमानंगीकर्तृत्वात् सार्थक्यवादिनं प्रति च प्रतिज्ञायास्तथात्वनिराकरणात् ॥
वाक्यद्वयाभिप्रायेणाह ॥ तज्जन्येति ॥ यथाश्रुतार्थं निरस्यति ॥ नत्विति ॥ ननु विप्रतिपत्तौ कोटिप्रदर्शनं किमर्थमित्यत आह ॥ तत्प्रदर्शनं चेति ॥ तथा
च साधारणधर्मादिसत्वेपि न क्षतिः ॥ तस्यं विप्रतिपत्तिकोटित्वस्यास्वातंत्र्येणेति ॥ तद्विशिष्टबुद्धौ तन्मुख्यविशेष्यकज्ञानत्वेन हेतुत्वादिति भावः ॥
ननु शाब्दबोधजनकवन्हिपदार्थोपस्थितेरेव स्वातंत्र्येण कोट्युपस्थितिरूपायाः सत्वात् कुतो न वन्हिकोटिकसंशय इत्यत आह ॥ अथ वेति ॥ विप्र
तिपत्तिकोटित्वं च तद्घटकपदजन्यस्मृतिकोटित्वं ॥ परोक्षज्ञानानां निश्चयात्मकं दावेति सिद्धांतमनुरुध्याह ॥ वस्तुत इति ॥ ननु तथापि वन्हिमद्वृद्धं को

टिंकत्वावन्हिकोटिकसंशयोनानुपपन्नोबाधकाभाववमहानसीयवन्हिकोटिकसंशयवदत आह॥ यद्वेति ननु यया प्रतिज्ञायावयवांतरसहकारेणैव
७६ बोधोऽजनितः तादृशप्रतिज्ञायां अतिरिक्तविषयकबोधजनकत्वात्तत्राव्याप्तेर्दीधितावकथनान्न्यूनतेत्याशंक्य तत्संग्रहार्थमंतरापदस्यार्थमाह॥
हेत्वर्थेति एवं च विशेषाभाववतां मध्ये सामान्याभाववतोऽपि प्रविष्टत्वमिति अजतितावयबोधकप्रतिज्ञाया असंग्रहः॥ न्यूनतां स्फुटीकरोति॥ एतेने
त्यादिना॥ निराकांक्षेति॥ ननु निराकांक्षवाक्यस्य कथं न्यायांतर्गतत्वमिति चेत्॥ उपनयघटकवन्हिपदसंबंधिपदायंपदानामेव न्यायांतर्गतत
यातेषु वानुपूर्वीभ्रमस्याभिप्रेतत्वात्॥ एतेव प्रतिज्ञाविषयकनिराकांक्षविषयकभ्रमपरत्वं न संभवति निराकांक्षविषयताया जनकतानवच्छेद
कत्वादिति प्रस्तुतं॥ तच्छालित्वस्यांत्यवर्ण एव विश्रांतेराह॥ तच्छालित्वं चेति॥ अनुपूर्वीघटकवर्णत्वव्यापकसमुदायत्वं च न प्रत्येकं प्रतिज्ञासुत
थासति यत्किंचिज्ज्ञानविषयवर्णत्वव्यापकत्वमेकदेशेऽपीत्यतः प्रतिज्ञाऽघटकवर्णेतद्घटकवर्णत्वभ्रमात्मकाकांक्षावारणाय भ्रमान्यत्वं प्रागुक्त
रीत्या यत्किंचित्वप्रकारतास्थाने विषयतां च निवेशयन्गुरुतरमाकांक्षाघटकत्वं परित्यज्य जनिताजनकेति भ्रमावृत्तित्वनिवेशे विशिष्टप्रतिज्ञावि
षयिताया अपि भ्रमवृत्तित्वादसंभव इति भ्रमान्येति॥ यत्किंचित्त्वनिवेशाव्यावृत्तिः पूर्ववत्॥ अन्यूनविषयकत्वदले वास्तववैशिष्ट्य
निवेशो भ्रमसाधारणजन्यताकप्रतिज्ञायामसंभवमाह॥ अन्यूनेति॥ विशिष्टार्थबोधश्च प्रमात्मक एव॥ तादृशवाक्यं प्रतिज्ञास

मानाकारवाक्यं वाक्यपदेनाकांक्षादिमत्त्वलाभे शाब्दपदापेक्षा दीधितिकृतैवोपवर्णिता तां स्फुटीकरोति॥ शाब्देति॥ स्वयं शाब्दपदस्य
तल्लाभे वाक्यपदायेदेगन्धमुत्पादयति॥ शाब्दबोधं यतीति॥ ज्ञानादेः॥ योग्यताज्ञानादेः॥ एवं च भट्टाचार्यव्याख्यायां शाब्दवाक्यपदयो
रुभयोरेवाकांक्षादिमत्त्वलाभार्थकत्वं यत्त्विनिमत्तेन च वाक्यपदादाकांक्षादिलाभः शाब्दपदाद्वितीयशाब्दलाभरस्त्येवमनयोर्भेद
इति बोध्यं॥ ज्ञात्वुपस्थापकेति वक्तव्यविशेषपदोपादानफलं दर्शयति शाब्दपदस्येति॥ आकांक्षादिकंचो विनानुपूर्वीकित्व
घटकप्रतिज्ञायां वा विशेष्यदले वा निवेश्यं॥ इदं तु बोध्यं॥ प्रतिज्ञोत्तरहेतूत्तरोदाहरणोत्तरोपनयोत्तरनिगमनत्वावच्छिन्नभेदप्रति
योगितावच्छेदकत्वं नो विवेश्यं॥ इदं तु बोध्यं॥ प्रतिज्ञोत्तरहेतूत्तरोदाहरणोत्तरोपनयोत्तरनिगमनत्वावच्छिन्नप्रतियोगितावच्छेदक
त्वं नो विनानुपूर्वीकत्वं किंतु निगमनपूर्वोपनयपूर्वोदाहरणपूर्वहेतुपूर्वत्वावच्छिन्नप्रतियोगिताकभेदप्रतियोगितावच्छेदकत्वं हेतु
पूर्वत्वान्तं वा प्रतिज्ञात्वावनिवेशेन लाघवात्॥ एवं च पर्वतो वह्निः संबंधी निराकांक्षवाक्यमुदास इति पंक्तिर्यथाश्रुतैव संगच्छते न्याया
नंतर्गततादृशवाक्येषु विनानुपूर्वीकत्वसंभवात्॥ ननु प्रागभावानुपगमे न तत्पूर्वत्वं तदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वमुत्प
त्तिघटितयानुपूर्वी निर्वाच्यं॥ संसर्गतया तन्निवेशो वलक्षणग्रहस्य तद्ग्रहं विनापि भावात्॥ सामान्यलक्षणायामुत्पत्त्यनुगमप्रकार

स्यप्रदर्शितत्वाच्चेतिस्माद्विशेष्यदलेएवतन्निवेशः॥ इतिमूलप्रतिज्ञाविवरणम्॥ ॥५॥ ॥इतिग्रंथसमाप्तिः॥ श्रीकृष्णः॥ ५॥

७१